॥ श्रीगणेशाय नमः॥

श्री वरदराजाचार्यप्रणीता

लघुसिद्धान्तकौमुदी

नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम्।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम्॥

अथ संज्ञाप्रकरणम्

अ इ उ ण् ।१।	ऋ लृ क् ।२।	ए ओ ङ् ।३।
ऐ औ च् ।४।	ह य व र ट् ।५।	ल ण् ।६।
ञ म ङ ण न म् ।७।	झ भ ञ् ।८।	घ ढ ध ष् ।९।
ज ब ग ड द श् ।१०।	ख फ छ ठ थ च ट त व् ।११।	
क प य् ।१२।	श ष स र् ।१३।	ह ल् ।१४।

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि। एषामन्त्या इतः। हकारादिष्वकार उच्चारणार्थः। लण्मध्ये त्वित्संज्ञकः।

गणराजं गुरुं नत्वा शारदां कुलदेवताम्।
बालानां सुखबोधाय, व्याख्यामेतां करोम्यहम्॥

१. कौमुदी चन्द्रिका। मोदते इति मुदः, हर्ष आनन्दो वा। कोः पृथिव्याः मुदः कुमुदः, यद्वा कौ पृथिव्यां मुदः येन यस्माद् वा असौ कुमुदः = चन्द्रमाः। तस्य कुमुदस्य इयं कौमुदी अर्थात् प्रकाशिका ज्योत्स्ना वा। वैयाकरणानां = व्याकरणाध्येतॄणां व्याकरणवेतॄणां वा ये सिद्धान्ताः निर्णीतार्थाः, तेषां कौमुदी इव कौमुदी इति सिद्धान्तकौमुदी। लघ्वी चासौ सिद्धान्तकौमुदी इति लघुसिद्धान्तकौमुदी अथवा लघवः= अल्पाः (न सर्वे) सिद्धान्ताः लघुसिद्धान्ताः तेषां कौमुदी इति लघुसिद्धान्तकौमुदी। चन्द्रिका यथा अन्धकारं निरस्य पदार्थान् सुखं प्रकाशयति, तथा इयमपि ग्रन्थरूपा कौमुदी वैयाकरणानां सिद्धान्तान् सारल्येन प्रकाशयति, बालान् बोधयति। अतः अस्याः कौमुदीसादृश्यात् कौमुदीत्वमिति ज्ञेयम्।

२. अहं (वरदराजाचार्यः) शुद्धां = दोषशून्यां निर्मलां वा गुण्यां = प्रशस्तगुणोपेतां (सत्त्वरजस्तमसां मध्ये सत्त्वगुणस्यैव प्रशस्तत्वात् गुणशब्देन अत्र सत्त्वगुणस्यैव ग्रहणात् सत्त्वगुणप्रधानाम् इत्यर्थः) सरस्वतीं = ज्ञानाधिष्ठात्रीं वाग्देवतां नत्वा=प्रणम्य पाणिनीयप्रवेशाय=पाणिनिप्रोक्ते शब्दशास्त्रे सुकुमारमतीनां बालानां प्रवेशो यथा स्यात् तथा कर्तुं ''लघुसिद्धान्तकौमुदी'' इति नाम्नीं रचनां पुस्तिकां वा करोमि = रचयामि।

१. **हलन्त्यम् १/३/३**
उपदेशेऽन्त्यं हलित् स्यात्। उपदेश आद्योच्चारणम्। सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र।।

२. **अदर्शनं लोपः १/१/६०**
प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्।

---

३. एतानि चतुर्दशसूत्राणि माहेश्वराणि सूत्राणि कथ्यन्ते, यतो हि महर्षिः पाणिनिः तपो विधाय भगवतः महेश्वरात् इमानि प्राप्तवान्। महेश्वरात् आगतानि, अतः इमानि माहेश्वराणि इति उच्यन्ते। यथोक्तं नन्दिकेश्वरेण काशिकायाम्

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्।। इति

४. किमर्थानि एतानि ? इति प्रश्ने आह - अणादिसंज्ञार्थानि। अण् आदिः यासां ताः अणादयः, ताः संज्ञाः अणादिसंज्ञाः। अणादिसंज्ञाः अर्थः प्रयोजनं येषां, तानि (माहेश्वरसूत्राणि) अणादिसंज्ञार्थानि। अर्थात् अणादिसंज्ञाः एव एषां प्रयोजनमस्तीति भावः। एभिरेव सूत्रैः अणादयः प्रत्याहाराः निर्मीयन्ते इत्याशयः।

५. एषां प्रत्येकं सूत्राणाम् अन्ते भवाः वर्णाः (अन्त्याः णादयः वर्णाः) इत्संज्ञकाः सन्ति।

६. 'ह य व र ट्' इत्यतः आरभ्य व्यञ्जनवर्णाः उपदिश्यन्ते, तत्र प्रतिवर्णं पुनः पुनः अकारोच्चारणं किमर्थम् ? किं हलादिप्रत्याहारे अकारस्य अपि ग्रहणं भवति वा ? इति जिज्ञासायाम् आह - तत्र हकारादिषु अकारः उच्चारणार्थः, न किमपि तस्य अन्यत् प्रयोजनम्। विना स्वरं व्यञ्जनानामुच्चारणं न भवति इति हेतोः तत्र प्रतिव्यञ्जनं पुनः पुनः अकारोच्चारणमिति भावः। लण् सूत्रे तु लकारात् परः यः अकारः स न केवलः उच्चारणप्रयोजनकः, अपितु इत्संज्ञकः सः। तेन च रप्रत्याहारः सिद्ध्यति इति कैय्यटेन कृता कल्पना, तामेव कैय्यटकल्पनाम् अनुसृत्य भट्टोजिदीक्षितः वरदराजाचार्यश्चापि लिखति- 'लण्मध्ये त्वित्संज्ञकः' इति।

१. **हलन्त्यम्** - हल् + अन्त्यम् इतिच्छेदः।

पाणिनेः अष्टाध्याय्याम् अष्टौ अध्यायाः सन्ति। प्रत्यध्यायं चत्वारः पादाः, प्रतिपादं च नैकानि सूत्राणि सन्ति। अत्र सूत्राणाम् अग्रे उल्लिखिता संख्या क्रमशः अध्यायस्य, पादस्य, सूत्रस्य च बोधिका अस्ति। यथा अस्मिन् सूत्रे १।३।३ इति संख्या बोधयति यदिदं प्रथमाध्यायस्य तृतीयपादस्य तृतीयं सूत्रम् अस्ति।इदं सूत्रम् उपदेशे विद्यमानस्य अन्त्यस्य हलः = व्यञ्जनस्य इत्संज्ञां करोति। उपदेशः कः ? इति प्रश्ने आह - उपदेशः आद्योच्चारणम् इति। आद्यमुच्चारणम्, आद्यानां पाणिन्यादिमुनीनाम् उच्चारणं वा उपदेशः उच्यते। केचन तु

''धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।
आगमप्रत्ययादेशाः उपदेशाः प्रकीर्तिताः।।

इति उपदेशाः इति मन्यन्ते। अतः एषां धात्वादीनाम् अन्त्यस्य हलः अनेन सूत्रेण इत्संज्ञा विधीयते।

'हलन्त्यम्' इत्येतावत् एवं सूत्रमस्ति, किन्तु अस्य विवरणे वृत्तौ 'उपदेशे' 'इत्' इति पदद्वयम् अधिकं लिखितं, तत् कुतः समायातमिति प्रश्ने आह-'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र' इति। अर्थात् सूत्रे साक्षाद् अनुल्लिखितमपि सूत्रार्थज्ञानाय अपेक्षितं पदं सूत्रान्तराद्= अन्यस्मात्सूत्राद् अनुवर्तनीयं भवति। अतः अत्र 'उपदेशे' 'इत्' इति पदद्वयं 'हलन्त्यम्' इति सूत्रे अनुल्लिखितमपि सत् ''उपदेशेऽजनुनासिक इत्'' इति सूत्राद् अनुवृत्तिद्वारा आगच्छति इति भावः।

२. **अदर्शनं लोपः** - शास्त्रतः प्रसक्तस्य प्राप्तोच्चारणस्य उच्चारणाभावः अत्र अदर्शनपदस्य अर्थः। अर्थात् उपदेशे विद्यमानसत्ताकस्य वर्णसमुदायस्य तदंशस्य वा उच्चारणाभावः लोपसंज्ञकः भवति। विद्यमानस्यापि दर्शनाभावः = श्रव्यत्वाभावः लोपः इति उच्यते इति भावः।

३. **तस्य लोपः १/३/९**
तस्येतो लोपः स्यात्। णादयोऽणाद्यर्थाः[१]।

४. **आदिरन्त्येन सहेता १/१/८१**
अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्। यथाऽणिति अ इ उ वर्णानां संज्ञा। एवमच्हल् अल् इत्यादयः।

५. **ऊकालोऽज्झ्रस्वदीर्घप्लुतः १/२/२८**
उश्च ऊश्च ऊ३श्च वः। वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्। स प्रत्येकमुदात्तादिभेदेन त्रिधा।

---

३. **तस्य लोपः** – तस्य इतः=इत्संज्ञकस्य लोपो भवति अर्थात् यस्य वर्णस्य इत्संज्ञा क्रियते, तस्य वर्णस्य लोपः = अदर्शनम्=उच्चारणाभावः वा भवति।

१. प्रतिमाहेश्वरसूत्रम् अन्त्यः वर्णः इत्संज्ञकः इति उक्तम्, यस्य च इत्संज्ञा भवति, तस्य च लोपः अपि भवति इत्यपि उक्तम्। अतः एतादृश्यां स्थितौ सूत्रान्त्यानां ण्क्ङ्चादीनां माहेश्वरसूत्रेषु पाठस्य कः लाभः ? तेषाम् तु लोपः भविष्यत्येव, अतः ते णादयः किमर्थाः इति प्रश्ने आह – 'णादयोऽणाद्यर्थाः' इति।अर्थात् एते णादयः अणादिप्रत्याहारप्रयोजनकाः सन्ति। एतेषाम् इत्संज्ञकत्वात् एभिः अणादयः प्रत्याहाराः रचयिष्यन्ते इति भावः। अणादि प्रत्याहाराः अर्थः प्रयोजनं येषां ते अणाद्यर्थाः।

४. **आदिरन्त्येन सहेता** – आदिः अन्त्येन सह इता इतिच्छेदः। अन्त्येन इत्संज्ञकेन सह आदिः मध्यवर्तिनां स्वस्य च संज्ञा भवति। यथा 'अ इ उ ण्' इत्यत्र अन्त्यः ण् वर्णः इत्संज्ञकः। तेन इत्संज्ञकेन सह आदिः 'अण्' इति मध्यवर्तिनोः 'इ उ' इत्यनयोः स्वस्य च (आदेः अकारस्य) संज्ञा = बोधकः भवति, अतः तादृशः आदिः 'अण्' इति 'अ इ उ' इति वर्णत्रयस्य संज्ञा भवति। अन्त्यस्य इतः तु तत्र ग्रहणं न भवति। एवमेव अच् हल् अलित्यादयः प्रत्याहारा अपि बोध्याः। तद्यथा –अन्त्येन इता 'च्' इत्यनेन सह आदिः 'अच्' इति 'अ इ उ ऋ लृ ए ओ ऐ औ' इत्येतेषां वर्णानां संज्ञा भवति। 'हल्' इति तु 'ह य व र ट्' इत्यतः आरभ्य सर्वेषां व्यञ्जनानां संज्ञा। अल् इति तु स्वराणां व्यञ्जनानां समेषां संज्ञा, अतः 'अल्' इति वर्णपर्यायः। 'हल्' इति प्रत्याहारे आदित्वेन 'ह य व र ट्' सूत्रस्थः हकारः ग्राह्यः, न तु चतुर्दशतमसूत्रस्थः इति विशेषः। पाणिनीयतन्त्रे सूत्रेषु वार्तिकेषु च व्यवहृतानां प्रत्याहाराणां संख्या ४२ वर्तते, तद्यथा अण्, अक्, अच्, अट्, अण् अम्, अल्, अश् इक्, इच्, इण्, उक्, एङ्, एच्, ऐच्, खय्, खर्, ङम्, चय्, चर्, छव्, जश्, झश्, झय्, झर्, झल्, झष्, बश्, भष्, मय्, यञ्, यण्, यम्, यय्, यर्, रल्, वल्, वश्, शर्, शल्, हल्, हश् इति।

५. **ऊकालः अच् ह्रस्वदीर्घप्लुतः** इति पदच्छेदः। 'वः' इति 'ऊ' इत्यस्य प्रथमाबहुवचने रूपम्। 'वाम्' इति तु तस्य षष्ठीबहुवचने। 'उ' इत्यस्य 'ऊ' इत्यस्य 'ऊ ३' इत्यस्य च उच्चारणे यः कालः अपेक्ष्यते सः 'ऊकालः। ऊकाल इव कालः यस्य अचः, सः अच् ऊकाल इत्युच्यते। तादृशः ऊकालः अच् क्रमशः ह्रस्वः, दीर्घः, प्लुतश्च संज्ञः भवति। अयमाशयः – 'उ' इति एकमात्रिकस्य उच्चारणे यः कालः, तादृशः कालः यस्य अचः, सः अच् ह्रस्वसंज्ञकः। यस्य 'ऊ' इति द्विमात्रिकस्य उच्चारणकालसदृशः कालः, सः अच् दीर्घसंज्ञकः। यस्य च 'ऊ३' इतिवत् उच्चारणकालः (त्रिमात्रिकोच्चारणकालसदृशःकालः) स अच् प्लुतसंज्ञकः भवतीति ज्ञेयम्। 'ऊ' शब्दः अत्र एकमात्रद्विमात्रत्रिमात्रकुक्कुटरुतस्य अनुकरणपरः। स च ह्रस्वः दीर्घः प्लुतश्च प्रत्येकम् उदात्तादिभेदत्रयेण त्रिधा भिद्यते। के सन्ति उदात्तादयः? अत वक्ष्यते 'उच्चैरुदात्तः इत्यादि।

६. **उच्चैरुदात्तः १/२/२९**

तात्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्।

७. **नीचैरनुदात्तः १।२।३०**

ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात्।

८. **समाहारः स्वरितः १/२/३१**

यस्मिन् उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेते सोऽच् स्वरितसंज्ञः स्यात्। स नवविधोऽपि प्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा।

९. **मुखनासिकावचनोऽनुनासिकः १/१/८**

मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्। तदित्थम् – अ इ 3 ऋट एषां वर्णानां प्रत्येकभष्टादश भेदाः। लृवर्णस्य द्वादश। तस्य दीर्घाभावात्। तेषामपि द्वादश। तेषां ह्रस्वाभावात्।

---

६. **उच्चैरुदात्तः** – उच्चैः उदात्तः इतिच्छेदः। अत्र उच्चैः इति शब्दः अधिकरणशक्तिप्रधानः ऊर्ध्वभागेऽर्थे विद्यते। नादधर्मविशेषः उच्चैस्त्वं तु अत्र न विवक्षितं, तथा सति उपांशूच्चारणे स्वरस्य उदात्तता न स्यात्। ताल्वादिस्थानानाम् ऊर्ध्वम् अधः मध्यश्च इति भागाः भवन्ति, तेषु सभागेषु ताल्वाद्युच्चारणस्थानेषु ऊर्ध्वभागे निष्पन्नः अच् उदात्तसंज्ञः भवति इत्यर्थः।

७. नीचैः अनुदात्तः इतिच्छेदः। अत्र नीचैः इतिशब्दः अपि अधिकरणशक्तिप्रधानः सन् अधोभागेऽर्थे वर्तते। अतः ताल्वादिषु सभागेषु उच्चारणस्थानेषु अधोभागे निष्पन्नः अच् अनुदात्तसंज्ञः भवति इति सूत्राशयः।

८. यस्मिन् स्वरे उदात्तत्वस्य अनुदात्तत्वस्य च उभयोः वर्णधर्मयोः समाहारः भवति सः अच् स्वरितसंज्ञः भवति। इत्थम् उदात्तानुदात्तस्वरिताः वर्णधर्माः कथिताः। लब्धह्रस्वदीर्घप्लुतसंज्ञः अच् प्रत्येकम् उदात्तानुदात्तस्वरितरूपभेदत्रयेण त्रिधा सन् नवविधः सञ्जातः।स च नवविधः अच् प्रत्येकम् अनुनासिकत्वधर्मेण अननुनासिकत्वधर्मेण च पुनः द्विधा भवति = द्विप्रकारकः भवति। कोऽयम् अनुनासिकत्वधर्मः ? को वा अनुनासिकः ? इति जिज्ञासायां यथाप्रसङ्गं वक्ष्यते – 'मुखनासिका०' इत्यादि।

९. मुखनासिकावचनः अनुनासिकः। मुखेन सहिता मुखसहिता। मुखसहिता च असौ नासिका, मुखनासिका, शाकपार्थिवादिसमासः उत्तरपदस्य 'सहिता' इत्यस्य लोपश्च। मुखद्वितीया नासिका मुखनासिका इति वा विग्रहः कार्यः। अत्रापि पूर्ववदेव समासः। उच्यते उच्चार्यते इति वचनः, अत्र कर्मणि ल्युट्।
मुखनासिकया वचनः इति मुखनासिका वचनः अर्थात् मुखसहितनासिकया अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादशभेदाः। लृवर्णस्य द्वादश तस्य दीर्घाभावात्। एचामपि द्वादश, तेषां ह्रस्वाभावात्।

उच्चार्यमाणः वर्णः अनुनासिकसंज्ञः भवति। मुखं विना केवलया नासिकया उच्चारणासंभवात् मुखेन सहिता नासिका इत्युक्तम्। यस्य च केवलेन मुखेन एव उच्चारणं भवति, स वर्णः अननुनासिक कथ्यते। इत्थं स्पष्टं यत् मुखनासिकया उच्चार्यमाणः अनुनासिकः। केवलेन मुखेन – उच्चरितः अननुनासिकः भवति। अत्र मुखं च नासिका च इत्येवं द्वन्द्वसमासः न मन्तव्यः, अनयोः प्राण्यङ्गत्वात् एकवत्त्वस्य, समाहारस्य नपुंसकत्वात् ह्रस्वत्वस्य च आपत्तेः। इत्थं नवविधः सः अच् अनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा पुनः भवति, अतः अनेन पथा अ इ उ ऋ इत्येते वर्णाः प्रत्येकमष्टादशभेदवन्तः सञ्जाताः। लृवर्णः द्वादशभेदवान्, सः दीर्घः न भवति, अतः अस्य तन्मूलकाः षड्भेदाः न्यूनाः भवन्ति। लृवर्णस्य दीर्घत्वं न भवति, इत्यत्र महाभाष्यमेव प्रमाणम्, होतृ+लृकारः इत्यत्र होतॄकारः इत्येवं दीर्घविधानज्ञापनात्। एवमेव एच्प्रत्याहारगताः ए ओ ऐ औ इत्येते वर्णाः अपि प्रत्येकं द्वादशभेदवन्तः। तेषां ह्रस्वत्वं न भवति, अतः ह्रस्वमूलकाः षड्भेदाः न्यूनाः। अत्र अचां भेदविवरणतालिका द्रष्टव्या –

१०. तुल्यास्यप्रयत्नं सवर्णम् १/१/९

ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसञ्ज्ञं स्यात्। (ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्)। अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकाऽनुस्वारस्य। यत्नो द्विधा-आभ्यन्तरो बाह्यश्च। आद्यः पञ्चधा-स्पृष्ट-ईषत्स्पृष्ट-ईषद्विवृत-विवृत-संवृतभेदात्। तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तस्थानाम्। ईषद्विवृतमूष्मणाम्। विवृतं स्वराणाम्।
ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव। बाह्यप्रयत्नस्त्वेकादशधा - विवारः, संवारः, श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति। खरो विवाराः श्वासाः अघोषाश्च। हशः संवारा नादा घोषाश्च। वर्गाणां प्रथमतृतीयपञ्चमाः यणश्चाल्पप्राणाः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः। कादयो मावसानाः स्पर्शाः। यणोऽन्तःस्थाः। शल ऊष्माणः। अचः स्वराः। ⨯क ⨯ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः। प फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः। अं अः इत्यचः परावनुस्वारविसर्गौ।

अ इ उ ऋ लृ	अ इ उ ऋ ए ओ ऐ औ	अ इ उ ऋ लृ ए ओ ऐ औ
ह्रस्वभेदाः	दीर्घभेदाः	प्लुतभेदाः
ह्रस्व-उदात्तानुनासिकः	दीर्घ-उदात्तानुनासिकः	प्लुत-उदात्तानुनासिकः
ह्रस्व-उदात्ताननुनासिकः,	दीर्घ-उदात्ताननुनासिकः	प्लुत-उदात्ताननुनासिकः
ह्रस्व-अनुदात्तानुनासिकः	दीर्घ-अनुदात्तानुनासिकः	प्लुत-अनुदात्तानुनासिकः
ह्रस्व-अनुदात्ताननुनासिकः	दीर्घ-अनुदात्ताननुनासिकः	प्लुत-अनुदात्ताननुनासिकः
ह्रस्व-स्वरितानुनासिकः	दीर्घ-स्वरितानुनासिकः	प्लुत-स्वरितानुनासिकः
ह्रस्व-स्वरिताननुनासिकः	दीर्घ-स्वरिताननुनासिकः	प्लुत-स्वरिताननुनासिकः

अत्र दीर्घभेदप्रदर्शकपङ्क्तौ लृकारस्य उल्लेखः नास्ति तथा ह्रस्वभेदप्रदर्शने ए ओ ऐ औ इति वर्णानाम् उल्लेखः नास्ति।

१०. आस्यम्=मुखम्। आस्ये भवं वर्णोच्चारणस्थानं ताल्वादि अपि आस्यम्। आस्यस्थं ताल्वादि अत्र आस्यपदस्यार्थः। प्रकृष्टः यत्नः प्रयत्नः, वर्णोच्चारणात् प्राक्तनः यत्नः वा प्रयत्नः। आस्यं च प्रयत्नः च आस्यप्रयत्नौ। तुल्यौ आस्यप्रयत्नौ यस्य वर्णजालस्य तत् तुल्यास्यप्रयत्नं वर्णजालं परस्परं सवर्णसंज्ञं भवति इति सूत्राशयः। अतः मुखे भवं ताल्वादिस्थानम्, आभ्यन्तरप्रयत्नश्च इति एतद्द्वयं यस्य वर्णस्य येन वर्णेन तुल्यं भवति तौ वर्णौ परस्परं सवर्णौ भवतः। ऋकारलृकारयोः भिन्नस्थानजन्यत्वात् विशेषवचनद्वारा सावर्ण्यं विधीयते 'ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्' इति।कस्य वर्णस्य किं स्थानं, कश्च प्रयत्नः? इति जिज्ञासायां शिक्षावचनानि अर्थतः संगृह्णाति - अकुहविसर्जनीयानां कण्ठः इत्यादि। अत्र कु चु टु तु पु इति कादिवर्गपञ्चकस्य बोधकाः, अर्थात् कु = क ख ग घ ङ इति। एवमेव चु टु तु पु विषयेऽपि ज्ञेयम्। अ, क, ख, ग, घ, ङ, ह, विसर्गश्च एषां वर्णानाम् उच्चारणस्थानं कण्ठः। इ, च, छ, ज, झ, ञ, य, श एषां स्थानं तालु। ऋ, ट, ठ, ड, ढ, ण, र, ष एषां स्थानं मूर्धा। लृ, त, थ, द, ध, न, ल, स एषां स्थानं दन्ताः। अत्र दन्तशब्देन दन्तमूलं ग्राह्यम्, अन्यथा तु भग्नदन्तस्य एषां वर्णानामुच्चारणमेव न स्यात्। उ, प, फ, ब, भ, म, उपध्मानीयश्च एषां स्थानम् ओष्ठौ। उपध्मानीयः, जिह्वामूलीयः, विसर्गः, अनुस्वारश्च कः इति अग्रे व्याख्यास्यते। ञ म ङ ण न इति प्रतिवर्गं पञ्चमवर्णस्य नासिकाऽपि स्थानमधिकम्। स्वस्ववर्ग्यं स्थानं तु ताल्वादि तेषाम् अस्त्येव, अतः एषां वर्गपञ्चमानां द्वे द्वे स्थाने स्तः इति विज्ञेयम्। एकारस्य ऐकारस्य च कण्ठतालु, ओकारस्य औकारस्य च कण्ठोष्ठम् उच्चारणस्थानम्। वकारस्य दन्तोष्ठं, जिह्वामूलीयस्य जिह्वामूलम्, अनुस्वारस्य च नासिका स्थानमिति वर्णानां स्थानवर्णनम्।

११. अणुदित्सवर्णस्य चाप्रत्ययः १/१/६९

प्रतीयते विधीयते इति प्रत्ययः। अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात्। अत्रैवाण् परेण णकारेण।

कु चु टु तु पु एते उदितः। तदेवम् 'अ' इत्यष्टादशानां संज्ञा। तथेकारोकारौ। ऋकारस्त्रिंशतः एवं लृकारोऽपि। एचो द्वादशानाम्। अनुनासिकाननुनासिकभेदेन यवला द्विधा, तेनाननुनासिकास्ते द्वयोर्द्वयोस्संज्ञा।

प्रसङ्गप्राप्तस्य प्रयत्नस्य विवरणम् - यत्नः द्विधा - आभ्यन्तरःबाह्यश्च। सूत्रे प्रयत्नशब्देन आभ्यन्तरस्य यत्नस्य ग्रहणं बोध्यम्। प्रकृष्टता च तस्य वर्णोच्चारणात् प्राग्भावित्वेन विज्ञेया। बाह्यस्य यत्नस्य बाह्यत्वं तु वर्णोच्चारणानन्तरं तस्य जायमानत्वात् विज्ञेयम् इति शिक्षाग्रन्थेषु स्पष्टम्। तत्र आद्यः = आभ्यन्तरप्रयत्नः पञ्चधा - स्पृष्टम्, ईषत्स्पृष्टम्, ईषद्विवृतम्, विवृतम्, संवृतम् इति। तत्र स्पर्शसंज्ञकानाम् आभ्यन्तरप्रयत्नः स्पृष्टम्। के स्पर्शाः ? कादयो मावसानाः स्पर्शाः इत्यनुपदमेव वक्ष्यते। अर्थात् लोके यः वर्णक्रमः प्रसिद्धः कवर्गचवर्गटवर्गतवर्गपवर्गरूपः, तत्र ककारात् आरभ्य पवर्गस्य पञ्चमवर्णं यावत् ये पञ्चविंशतिः वर्णाः, ते स्पर्शाः इति भावः। ईषत्स्पृष्टम् अन्तःस्थवर्णानां प्रयत्नः। के अन्तःस्थाः ? यणः अन्तःस्थाः। अर्थात् 'यवरल' एषां वर्णानाम् ईषत्स्पृष्टं प्रयत्नः। ईषद्विवृतं प्रयत्नः ऊष्मवर्णानाम्। के ऊष्माणः ? शलः इति। अर्थात् शल्प्रत्याहारगताः शषसहाःवर्णाः ऊष्मसंज्ञकाः, तेषामाभ्यन्तरप्रयत्नः ईषद्विवृतम्। स्वराणां विवृतं प्रयत्नः। के स्वराः ? अचः स्वराः। अर्थात् 'अ इ उ ऋ लृ ए ओ ऐ औ' इति अच्प्रत्याहारान्तर्गताः वर्णाः स्वराः उच्यन्ते, तेषां विवृतं प्रयत्नः। तर्हि संवृतं कस्य प्रयत्नः? इति प्रश्ने आह - ह्रस्वस्य अवर्णस्य प्रयोगे संवृतम्, प्रक्रियादशायां तु तस्य विवृतमेव। अर्थात् यत्र केवलस्य ह्रस्वस्य एकमात्रिकस्य अकारस्य प्रयोगः तत्र तस्य संवृतं प्रयत्नः। यत्र तस्य दीर्घत्वादिप्रक्रियाकार्यं सम्पादनीयं भवति, तत्र तस्य पुनः विवृतमेव प्रयत्नः भवति इति ज्ञेयम्। प्रक्रियायां तस्य यदि विवृतत्वं न भवेत् तर्हि देव+आलयः इत्यत्र ह्रस्वाकारस्य संवृतम्, आकारस्य च विवृतम् इत्येवं प्रयत्नभेदात् तयोः सावर्ण्यं न स्यात् ततश्च सवर्णदीर्घसन्धिः एव तत्र न भविष्यति। प्रक्रियायां तस्य अकारस्य अपि विवृतत्वे तु उभयोः प्रयत्नसाम्यात् सावर्ण्ये न काऽपि बाधा इति भावः। बाह्यप्रयत्नः एकादशधा-तद्यथा-विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्च। तत्र कस्य बाह्यप्रयत्नः कः ? इति जिज्ञासायाम् आह - खरो विवारा० इत्यादि। अर्थात् ख फ छ ठ थ च ट त क प श ष स इति खर् प्रत्याहारेआगतानां वर्णानां विवारः श्वासः अघोषः इति बाह्यप्रयत्नः। ये खलु हश प्रत्याहारान्तर्गताः 'ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द' वर्णाः, तेषां तु संवारः नादः घोषः इति बाह्यप्रयत्नः। तत्र पुनः प्रत्येकं वर्गस्य प्रथमः, तृतीयः, पञ्चमः अर्थात् क ग ङ, च ज ञ, ट ड ण, त द न, प ब म इति वर्णाः, यणः = य व र लाः च अल्पप्राणाः भवन्ति। अन्ये तु वर्गाणां द्वितीयचतुर्थवर्णाः ख घ, छ झ, ठ ढ, थ ध, फ भ एते तथा शलः = 'श ष स ह' एते च महाप्राणाः उच्यन्ते अर्थात् क्रमशः पूर्वोक्तानाम् अल्पप्राणः, पश्चादुक्तानां च महाप्राणः बाह्यप्रयत्नः। इत्येवं प्रत्येकं व्यञ्जनस्य चतुर्धा बाह्यप्रयत्नः। उदात्तः अनुदात्तः स्वरितश्च इत्येते तु केवलानां स्वराणामेव धर्माः, न तु व्यञ्जनानाम् इति 'उच्चैरुदात्तः' इत्यादौ स्पष्टम्। इत्थं विवारश्वासाघोषेषु च ट त क प इति वर्णाः अल्पप्राणाः, ख फ छ ठ थ श ष स इति वर्णाः महाप्राणाः। संवारनादघोषेषु य व र ल ञ म ङ ण न ज ब ग ड द इत्यल्पप्राणाः, शेषवर्णाः = ह झ भ घ ढ ध एते महाप्राणाः इति निर्णयः। तत्र स्पर्शादयः के ? इति तु व्याख्यातम्। इदानीं जिह्वामूलीयादिविषये आह - ककारात् खकारात् वा प्राग् अर्धविसर्गसदृशः जिह्वामूलीयः, पकारात् फकारात् वा प्राग् तादृश एव उपध्मानीयः इति उच्यते। अचः परः अनुस्वारः अं, इं इत्यादिरूपः, विसर्गश्च अपि अचः परः अः, इः इत्यादिरूपः शब्दप्रयोगे उपलभ्यते। अर्थात् अनुस्वारविसर्गौ एतादृशौ भवतः इति भावः। वर्णानां सवर्णसंज्ञायां स्थानस्य आभ्यन्तरप्रयत्नस्य च हेतुत्वम् अस्ति, अतः तयोः विवेचनं तु सार्थकं किन्तु बाह्ययत्नस्य तु तत्र सवर्णसंज्ञायाम् उपयोग एव न भवति, अतः तस्य प्रपञ्चः व्यर्थः इति शङ्कायां वक्तव्यम्-बाह्ययत्नस्य सावर्ण्ये उपयोगाभावेऽपि वर्णानां सादृश्यपरीक्षायाम् उपयोगः भवति एव, अतः तदर्थं कृतः अयं प्रपञ्चः सार्थक एव, न व्यर्थः इति।

११. **अणुदित् सवर्णस्य च अप्रत्ययः** इति पदच्छेदः। अप्रत्ययः अण् उदित् च सवर्णस्य संज्ञा अर्थात् ग्राहकः भवति। प्रतीयते=विधीयते=यः सूत्रेण क्रियते असौ प्रत्ययः अर्थात् आदेशः आगमः प्रत्ययश्च। यः सूत्रेण न क्रियते न विधीयते आदेशत्वेन आगमत्वेन प्रत्ययत्वेन वा असौ अप्रत्ययः। तादृशः अण् अर्थात् 'अ इ उ ऋ लृ ए ओ ऐ औ ह य व र ल' इत्येते वर्णाः सवर्णान् ग्राहयन्ति। यः विधीयमानः अण् आगमरूपः आदेशरूपः प्रत्ययरूपो वा स सर्वणस्य संज्ञा न भवति। किन्तु यः निमित्तरूपः अण्, उद्देश्यरूपो वा अण्, स सवर्णस्य संज्ञा ग्राहकः वा भवति, तस्य अविधीयमानत्वात्। अतः 'इको यणचि' इत्यादौ निमित्तरूपः अच्, उद्देश्यरूपः इक् (उभावपि

१२. **परः सन्निकर्षः संहिता १/४/१०९**
वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्।

१३. **हलोऽनन्तराः संयोगः १/१/७**
अज्भिरव्यवहिताः हलः संयोगसंज्ञाः स्युः।

१४. **सुप्तिङन्तं पदम् १/४/१४**
सुबन्तं तिङन्तं च पदसंज्ञं स्यात्।

इति संज्ञाप्रकरणम्

अणन्तर्गतौ) सवर्णान् ग्राहयतः। एवम् उदित् विधीयमानः अपि सवर्णस्य संज्ञा भवति। के उदितः ? कु चु टु तु पु एते उदितः। अर्थात् एते पञ्चविंशतिः वर्णा विधीयमाना अपि सवर्णान् ग्राहयन्ति। अण् इति परणकारेण पूर्वणकारेण वा इति सन्देहे सति आह-अत्रैवाण्-इति। अर्थात् सम्पूर्णे पाणिनीयतन्त्रे सर्वत्र पूर्वणकारेण अण् गृह्यते, किन्तु केवले अस्मिन्नेव सूत्रे परणकारेण ग्राह्यः इति व्याख्यानात् ज्ञायते। अतः अत्र सूत्रे 'अ इ उ ऋ ऌ ए ओ ऐ औ ह य व र ल' इत्येते वर्णाः अण्संज्ञया ज्ञेयाः। अन्यत्र तु 'अ इ उ' इति वर्णत्रयमेव। इत्थम् अविधीयमानः 'अ' अष्टादशानां सवर्णानां संज्ञा। ह्रस्वदीर्घप्लुतमूलकाः भेदाः पूर्वं प्रपञ्चिताः सन्ति, तत्र द्रष्टव्याः। एवमेव इकारः उकारश्चापि अष्टादशानां संज्ञा। ऋकारऌकारयोः सावर्ण्यात् ऋकारः आत्मनः अष्टादशानाम् ऌकारस्य च द्वादशानाम् इत्येवं मिलित्वा त्रिंशत् संज्ञा, ऌकारः अपि त्रिंशत् एव।
एचः प्रत्येकं द्वादशानां संज्ञा। अर्थात् ए ओ ऐ औ प्रत्येकं वर्णः स्वकीयानां द्वादशानां सवर्णानां बोधकः। ए ऐ इत्यनयोः ओ औ इत्यनयोश्च तुल्यस्थानत्वात् विवृतप्रयत्नवत्त्वाच्च सावर्ण्येन एकारः ऐकारस्य, ओकारः औकारस्य बोधकः, तस्मात् एकारः ओकारश्च चतुर्विंशतेः संज्ञकः इति शंका न करणीया, यतो हि एकारऐकारयोः ओकार-औकारयोः सावर्ण्याभावस्य ''ऐ औ च्'' इति सूत्रस्य पृथक्करणात् ज्ञापितत्वात्। सति सावर्ण्ये तु 'ए ओ ङ्' इति एकेनैव सूत्रेण सिद्धे 'ऐ औ च्' इति व्यर्थमेव स्यादिति भावः।यवलाः अनुनासिकाः अननुनासिकाश्च भवन्ति। अतः अननुनासिकाः अपि यवलाः प्रत्येकं द्वयोः द्वयोः संज्ञा। अर्थात् य् इति अनुनासिकस्य अननुनासिकस्य च बोधकः। एवमेव वकारः लकारश्चापि।

१२. संहितासंज्ञाविधायकं सूत्रमिदम्। परः=अतिशयितः, सन्निकर्षः = सामीप्यम् =अर्धमात्राधिककालव्यवधानाभावः। अर्धमात्राकालस्य व्यवधानं तु अवर्जनीयम्। अतः अर्धमात्राधिककालव्यवधानाभावेन वर्णानां सामीप्यं संहितासंज्ञं भवति, अर्थात् वर्णानाम् उच्चारणे अतिशयितसामीप्यमेव संहिता इति सिद्धम्।

१३. **हलोऽनन्तराः संयोगः** सूत्रमिदं संयोगसंज्ञाविधायकम्। अज्भिः = स्वरसंज्ञकैः वर्णैः अव्यवहिताः = व्यवधानरहिताः हलः=व्यञ्जनवर्णाः संयोगसंज्ञकाः भवन्ति।

१४. सुप् इति 'स्वौजसमौट्०' इति सूत्रगतप्रत्ययानाधारीकृत्य प्रत्याहारः, तिङ् इत्यपि ''तिप्तस्झि०'' इत्याधारीकृत्य प्रत्याहार एव। सुप्प्रत्ययः अन्ते यस्य, तिङ् प्रत्ययः वा अन्ते यस्य तत् सुबन्तं तिङन्तम्। तादृशं सुबन्तं तिङन्तं च पदसंज्ञकं भवति। अर्थात् अनेन सूत्रेण पदसंज्ञा विधीयते। रामः, देवी, वधूः, चित्रम् इत्यादयः सुबन्ताः। पठति, एधते, अपाठीत्, भविष्यति इत्यादयः तिङन्ताः शब्दाः, अतः एते पदसंज्ञकाः सन्तीति भावः।

इति संज्ञाप्रकरणम्

अभ्यासप्रश्नाः

१. उपदेशे अन्त्यम् इत् भवति -
(क) अच् (ख) हल्
(ग) विसर्गः (घ) अनुस्वारः ( )

२. इत्संज्ञकस्य लोपं करोति -
(क) हलन्त्यम् (ख) अदर्शनं लोपः
(ग) तस्य लोपः (घ) उपदेशेऽजनुनासिक इत् ( )

३. मुखनासिकया उच्चार्यमाणः वर्णः भवति-
(क) अनुस्वारः (ख) व्यञ्जनम्
(ग) अनुनासिकः (घ) स्वरः ( )

४. ऊष्मवर्णाः सन्ति -
(क) शषसहाः (ख) यवरलाः
(ग) कादयो मावसानाः (घ) अचः ( )

५. बाह्यप्रयत्नः भवति
(क) पञ्चधा (ख) षोढा
(ग) दशधा (घ) एकादशधा ( )

६. स्पर्शानां प्रयत्नः भवति -
(क) स्पृष्टम् (ख) ईषद्विवृतम्
(ग) विवृतम् (घ) संवृतम् ( )

७. लृवर्णस्य भेदाः भवन्ति -
(क) द्वादश (ख) अष्टादश
(ग) त्रिंशत् (घ) षोडश ( )

८. ऋकारः संज्ञा भवति -
(क) अष्टादशानाम् (ख) त्रिंशतः
(ग) विंशतेः (घ) द्वादशानाम् ( )

९. अनन्तराः हलः भवन्ति -
(क) संहितासञ्ज्ञाः (ख) संयोगसंज्ञाः
(ग) पदसंज्ञाः (घ) विसर्गसंज्ञाः ( )

१०. उदात्तानुदात्तस्वरिताः बाह्ययत्नाः भवन्ति -
(क) अचाम् (ख) खराम्
(ग) हशाम् (घ) वर्णमात्रस्य ( )

लघूत्तरात्मकाः प्रश्नाः -

११. माहेश्वरसूत्राणि कति ? तानि लिखत।
१२. कीदृशः हल् इत्संज्ञकः भवति ?
१३. हलन्त्यम् इति सूत्रस्य अर्थं लिखत।
१४. कस्य अचः कियन्तः भेदाः ? लिखत।
१५. कौ वर्णौ मिथः सवर्णौ भवतः ? तत्र नियमः कः ?
१६. अकारस्य प्रयत्नः कः ? प्रक्रियादशायां च कः ?
१७. जिह्वामूलीयः वर्णः कः ?
१८. के सवर्णस्य संज्ञाः भवन्ति ?

अथ अच्सन्धिः

१५. **इको यणचि ६/१/७७**
इकः स्थाने यण् स्यादचि संहितायां विषये। सुधी+उपास्यः इति स्थिते

१६. **तस्मिन्निति निर्दिष्टे पूर्वस्य १/१/६६**
सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्।

१७. **स्थानेऽन्तरतमः १/१/५०**
प्रसङ्गे सति सदृशतमः आदेशः स्यात्। सु ध् य् + उपास्यः इति जाते।

सन्धिः मेलनम्। द्वयोः वर्णयोः यत्र मेलनं भवति, तत्र एकस्य वर्णस्य उभयोः वा ध्वनिपरिवर्तनं सामान्यतया जायते। यत्र उभौ वर्णौ स्वरौ भवतः, तयोः मेलनं स्वरसन्धिः अच्सन्धिः वा उच्यते। तत्र प्रथमं तावत् यण्सन्धि : विचार्यते-

१५. **इको यणचि** - इकः यण् अचि इतिच्छेदः। इकः इति षष्ठ्यन्तं पदम् उद्देश्यम्। यण् इति प्रथमान्तं विधीयमानत्वात् विधेयभूतम्। अचि इति सप्तम्यन्तं निमित्तम्। यत् क्रियते तत् विधेयम्, यस्य क्रियते तद् उद्देश्यम्, यत्सम्बन्धेन क्रियते तद् निमित्तम्। इक् इति प्रत्याहारः, तत्र 'इ उ ऋ लृ' इति वर्णाः। यण् इत्यपि प्रत्याहारः तत्र 'य व र ल' इति वर्णचतुष्कम्। अच् प्रत्याहारे 'अ इ उ ऋ लृ ए ओ ऐ औ' इति वर्णाः। वर्णानाम् अतिशयितसन्निधि विषये इकः स्थाने यण् विधीयते अचि परे इति सूत्राशयः। 'सुधी+उपास्यः
इत्यवस्थायाम् क्रमशः उ, ई, उ इति वर्णत्रयम् इक्रूपम्, तेभ्यश्च परतः क्रमशः ई, उ आ इति अच्प्रत्याहारगताः वर्णाः सन्ति। अतः एव अस्याम् दशायां कतमस्य इकः स्थाने यण् विधेयः इति शंकायाम् - व्यवस्थापकं परिभाषासूत्रम् अवतारयति - **तस्मिन्निति।**

१६. **तस्मिन् इति निर्दिष्टे पूर्वस्य** इतिच्छेदः। इदं परिभाषासूत्रम्। अस्य अयमर्थः-सप्तमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेण व्यवधानशून्यस्य पूर्वस्य उद्देश्यस्य कर्तव्यम्। 'इको यणचि' इत्यत्र 'अचि' इति सप्तमीनिर्देशः। सुधी+उपास्यः इत्यत्र अचः (निमित्तात्) व्यवधानशून्यः पूर्ववर्ती इक् धकारोत्तरवर्ती ईकारः एव अस्ति। 'अतः' तस्यैव यण् विधेयः नान्ययोः इकोः, तयोः अचः अव्यवहितपूर्वत्वाभावात्।

अत्र पुनः शंका - उद्देश्यविषये जातेऽपि समाधाने विधेयविषये पुनः प्रश्नः - यण् इति प्रत्याहारे 'यवरलाः' इति चत्वारः वर्णाः सन्ति। तत्र ईकारस्य स्थाने एषु कतमः विधेयः? सर्वे वा पर्यायेण स्युः? अतः व्यवस्थाकपम् अन्यत् परिभाषासूत्रं - ''स्थानेऽन्तरतमः'' इति अवतारयति।

१७. 'स्थाने' इत्यस्य 'प्रसङ्गे' इत्यर्थः। एकस्य स्थानिनः स्थाने बहूनाम् आदेशानां प्राप्तिप्रसङ्गे स्थानिना अन्तरतमः=सदृशतमः आदेशः विधेयः इति व्यवस्था। प्रकृतप्रयोगे ईकारस्य स्थाने यवरलेषु यकार एव यण् भवति, ईकारयकारयोः स्थानकृतसादृश्यात्। इत्थं 'सुधी+उपास्यः' इत्यत्र उक्तपरिभाषासूत्रद्वयसहायतया ''इको यणचि'' इति सूत्रेण ईकारस्य स्थाने यकाररूपे यणादेशे कृते 'सु ध् य् + उपास्यः' इति स्थितिः जाता। मधु+अरिः इत्यत्र उकारस्य सदृशतमः वकारः, धातृ+अंशः इति ऋकारस्य सदृशतमः रकारः, लृ+आकृतिः इत्यत्र लृकारस्य सदृशतमः लकाररूपयणादेशः भवति। अतः मध्वरिः, धात्रंशः, लाकृतिः इत्यादयः प्रयोगाः सिध्यन्ति।

१८. **अनचि च ८/४/४७**
अचः परस्य यरो द्वे वा स्तः न त्वचि। इति धकारस्य द्वित्वेन सुध्ध्य् उपास्यः इति जाते।

१९. **झलां जश् झशि ८/४/५३**
स्पष्टम्। इति पूर्वधकारस्य दकारः।

२०. **संयोगान्तस्य लोपः ८/२/२३**
संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्।

२१. **अलोऽन्त्यस्य १/१/५२**
षष्ठीनिर्दिष्टोऽन्त्यस्यालः आदेशः स्यात्। इति यलोपे प्राप्ते (यणः प्रतिषेधो वाच्यः) सुद्ध्युपास्यः । मद्ध्वरिः । धात्त्रंशः । लाकृतिः ।

---

१८. अत्र 'यरोऽनुनासिकेऽनुनासिको वा' इति सूत्रात् 'यरः' 'वा' इति पदद्वयम् ''अचोरहाभ्यां द्वे' इति सूत्रात् च 'अचः' 'द्वे' इति पदद्वयम् अनुवर्तते। न अचि इति अनचि अर्थात् अज्भिन्ने वर्णे। अचः परस्य यरः विकल्पेन द्वित्वं भवति अज्भिन्ने अर्थात् व्यञ्जने वर्णे परे इति सूत्राशयः। यर् इति प्रत्याहारः तत्र 'ह' वर्णं परित्यज्य सर्वाणि व्यञ्जनानि भवन्ति। सुध् य् + उपास्यः इत्यत्र उकारात् परस्य धकाररूपस्य यरः अनेन सूत्रेण द्वित्वं भवति यतो हि तस्मात्परः अज्भिन्नः वर्णः यकारः विद्यते। अतः सु ध् ध् य् + उपास्यः इति स्थितिः।

१९. **झलां जश् झशि** इति सूत्रं स्पष्टार्थकम्, अतः स्पष्टम् इति उक्तम्। झल्प्रत्याहारगतानां वर्णानां स्थाने जश् = ज ब ग ड द एषु यथायोग्यं आदेशः भवति, झशि = झ भ घ ढ ध ज ब ग ड द इत्येतेषु वर्णेषु परेषु सत्सु। अनेन सूत्रेण सु ध् ध् य् इत्यत्र पूर्वधकाररूपस्य झलः स्थाने तवर्गः तृतीयः दकाररूपः जशादेशः विधीयते द्वितीये धकारे (झशि) परे। अतः सुद् ध् य् + उपास्यः इति दशा सञ्जाता। तत्र ...

२०. संयोगान्तस्य पदस्य लोप भवति इत्यर्थकेन अनेन सूत्रेण सम्पूर्णस्य सुद्ध्य् इति पदस्य लोपः प्राप्तः, अस्य संयोगान्तत्वात्। अतः सम्पूर्णस्य लोपः न स्यात् एतदर्थम् अन्यां व्यवस्थां सम्पादयन् परिभाषासूत्रमवतारयति - 'अलोऽन्त्यस्य' इति ---

२१. **अलः अन्त्यस्य** इतिच्छेदः। विधीयमानः आदेशः, विधिसूत्रे षष्ठ्यन्तपदेन निर्दिष्टस्य = बोधितस्य यः अन्त्यः अल्, तस्य अलः (अन्त्यस्य अलः) स्थाने स्यात् इति सूत्रस्याशयः। 'संयोगान्तस्य लोपः' इति विधिसूत्रम्। अत्र षष्ठ्यन्तं पदं 'संयोगान्तस्य' इति, एतेन निर्दिष्टं सु द् ध् य् इति पदम्, अस्य च अन्त्यः अल् यकारः, तस्य स्थाने विधायकसूत्रेण विधीयमानः लोपात्मकः आदेशः स्यात्। इत्येवं सुद्ध्य् इत्यत्र यकारस्य लोपः प्राप्तः। 'यणः प्रतिषेधो वाच्यः' इति वार्तिकेन अन्त्यस्य यणः लोपः प्रतिषिध्यते। अतः
सुद्ध्य् इत्यत्र अन्त्यस्य यकारस्य यण्त्वात् लोपनिषेधात् सुद्ध्युपास्यः इति सिद्ध्यति।

रूपसिद्धिलेखनप्रकारः -

सुधी+उपास्यः इत्यत्र ''तस्मिन्निति निर्दिष्टे पूर्वस्य'' ''स्थानेऽन्तरतमः'' इति सूत्रद्वयसहकारेण ''इको यणचि'' इति सूत्रेण धकारात्परस्य ईकारस्य यणि यकारे कृते सु ध् य् + उपास्यः इति जाते 'अनचि च' इति सूत्रेण 'धकारस्य विकल्पेन द्वित्वे कृते सुध् ध् य् + उपास्यः इति स्थिते ''झलां जश् झशि'' इति सूत्रेण पूर्वधकारस्य जश्त्वेन दकारे कृते सु द् ध् य् + उपास्यः इत्यवस्थायाम् ''अलोऽन्त्यस्य'' इति सूत्रसहायतया ''संयोगान्तस्य लोपः'' इत्यनेन सूत्रेण अन्त्यस्य यकारस्य लोपे प्राप्ते ''यणः प्रतिषेधो वाच्यः'' इति वार्तिकेन निषेधे कृते वर्णसम्मेलने सति सुद्ध्युपास्यः इति रूपं सिद्धम्। द्वित्वाभावपक्षे सुध्युपास्यः इति द्वितीयं रूपं निष्पन्नम्।एवमेव- मधु+अरिः - म ध् व् अरिः - मध् ध् व् अरिः - मद्ध्व्अरिः - मद्ध्वरिः, मध्वरिः इति। धातृ + अंशः -

२२. **एचोऽयवायावः ६/१/७८**
एचः क्रमादय् अव् आय् आव् एते स्युरचि।

२३. **यथासङ्ख्यमनुदेशः समानाम् २/३/१०**
समसम्बन्धी विधिर्यथासंख्यं स्यात्। हरये। विष्णवे। नायकः। पावकः।

२४. **वान्तो यि प्रत्यये ६/१/७९**
यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः। गव्यम्। नाव्यम्। (अध्वपरिमाणे च) गव्यूतिः।

धातृ्+अंशः - धा त् त् र् + अंशः - धात्त्रंशः, धात्रंशः। लृ+आकृतिः- ल्+आकृतिः -लाकृतिः इत्यादि रूपाणि सिध्यन्ति।

अन्यानि उदाहरणानि -

प्रति+एकम् = प्रत्येकम्। हरि+अनुभवः हर्यनुभवः। यदि + अपि = यद्यपि। तरु+अरिः = तर्वरिः। गुरु+आगमनम् = गुर्वागमनम्। चारु+अङ्गी=चार्वङ्गी। सु+आगतम्=स्वागतम्। पितृ+आज्ञा=पित्राज्ञा। कर्तृ+आयुः =कर्त्रायुः। लृ+अनुबन्धः=लनुबन्धः। घस्लृ+आदेशः = घस्लादेशः इत्यादीनि रूपाणि।

२२. **एचः अय् अव् आय् आवः** इतिच्छेदः। अत्र 'इको यणचि' इति सूत्रात् 'अचि' इति पदम् अनुवर्तते। एचः (ए ओ ऐ औ) इति उद्देश्यभूताः, अयादयःचत्वारः विधेयाः 'अचि' इति निमित्तपदम्। अतः अचि परे एचः स्थाने अयादयः स्युः इति सूत्रार्थः। अत्र चत्वारः स्थानिनः चत्वार एव आदेशाः। तत्र प्रथमस्य द्वितीयः, द्वितीयस्य प्रथमः अन्यः वा न स्याद् एतदर्थं व्यवस्थापकं सूत्रम् अवतारयति - यथासंख्यमिति-

२३. **यथासङ्ख्यम् अनुदेशः समानाम्।** समाः=समानसंख्याकाः सम्बन्धिन उद्देश्यविधेयाः स्थान्यादेशाः वा। यस्य सः विधिः=समसम्बन्धी विधिः, तत्र आदेशाः यथासंख्यं = क्रमशः स्युः। अर्थात् 'एचोऽयवायावः' इत्यत्र एच् इत्यस्य 'ए ओ ऐ औ' इति यः क्रमः, तदनुसारमेव अयादयः अपि क्रमशः स्युः। अतः प्रथमस्य एकारस्य अय्, द्वितीयस्य ओकारस्य अव्, तृतीयस्य ऐकारस्य आय्, चतुर्थस्य औकारस्य आव् आदेशः भवति इति व्यवस्था।

उदाहरणानां विश्लेषणम् -

हरे + ए, विष्णो + ए, नै+अकः, पौ+अकः इत्यत्र पूर्वत्र क्रमशः ए, ओ, ऐ औ सन्ति, तेभ्यः परतः अच्वर्णाः क्रमशः ए, ए, अ, अ इति सन्ति। अतः एचः स्थाने क्रमशः अय् अव् आय् आव् आदेशाः भवन्ति। अतः हर् अय् ए, = हरये, विष्ण् अव् ए = विष्णवे, न् आय् अकः = नायकः, प् आव् अकः=पावकः इति रूपाणि सिध्यन्ति।

रूपसिद्धिलेखनप्रकारः -

हरे + ए इत्यत्र ''यथासंख्यमनुदेशः समानाम्'' इति सूत्रसहकारेण ''एचोऽयवायावः'' इति सूत्रेण रकारात् परस्य एकारस्य स्थाने अय् आदेशे कृते हर् अय् ए इति स्थितौ वर्णसम्मेलने कृते 'हरये' इति रूपं सिद्धम्। एवमेव विष्णो+ए - विष्ण् अव् ए - विष्णवे। नै + अकः - न् आय् अकः
= नायकः। पौ+अकः = प् आव् अकः = पावकः।

अन्यानि उदाहरणानि -

कपे+ए = कपये, रवये। रामे+ओः = रामयोः। भानो+ए = भानवे, गुरवे।
गौ+औ =गावौ। रै+औ=रायौ इत्यादीनि।

२४. 'यि' इति 'प्रत्यये' इति पदस्य विशेषणम्। 'यि' इत्यस्य यकारादौ इत्यर्थः। यकारः आदौ यस्य स यकारादिः। तादृशे यकारादौ प्रत्यये परे ओत् = ओकारस्य औत् = औकारस्य च स्थाने वान्तादेशौ भवतः। कौ वान्तौ ?

२४. वान्तो यि प्रत्यये ६/१/७९

यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः। गव्यम्। नाव्यम्। (अध्वपरिमाणे च) गव्यूतिः।

२५. अदेङ्गुणः १/१/२

अत् एङ् च गुणसंज्ञः स्यात्।

२६. तपरस्तत्कालस्य १/१/७०

तः परो यस्मात् स च तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्।

इति जिज्ञासायां वक्तव्यम् – 'एचोऽयवायावः' इत्यत्र ये चत्वारः आदेशाः अयादयः सन्ति, तेषु अव् आव् इति द्वौ वान्तौ स्तः, तौ अत्र ग्राह्यौ। अतः ओकारस्य औकारस्य च क्रमशः अव् आव् एतौ स्तः यकारादौ प्रत्यये परे इति सूत्रार्थः फलितः।

उदाहरणस्य विश्लेषणम् –

गो + यम्, नौ + यम् इत्यत्र ओकारात् औकारात् च परौ 'यम्' इति शब्दौ, तत्र यः यकारः स प्रत्ययस्य अस्ति उभयत्रापि। अतः यकारादिप्रत्ययः परः वर्तते, अतः ओकारस्य अव् आदेशः औकारस्य च आव् आदेशः भवति। अतः ग् अव् यम् = गव्यम् इति, न् आव् यम् = नाव्यम् इति रूपद्वयं सिद्ध्यति।

रूपसिद्धिलेखनप्रकारः –

गो + यम् इत्यत्र 'वान्तो यि प्रत्यये' इति सूत्रेण गकारोत्तरस्य ओकारस्य स्थाने अवादेशे कृते ग् अव् यम् इति जाते वर्णसम्मेलने च कृते गव्यम् इति रूपं सिद्धम्। नौ+यम् इत्यत्र औकारस्य आव् आदेशे न् आव् यम् = नाव्यम् इति रूपम्।

वार्तिकम् – (अध्वपरिमाणे च) अध्वा = मार्गः, तस्य परिमाणविशेषे वाच्ये

यूतिशब्दे परे गोशब्दस्य यः ओकारः, तस्य अवादेशः वक्तव्यः इति वार्तिकाशयः।

गव्यूतिः गो+यूतिः इत्यत्र ''अध्वपरिमाणे च' इति वार्तिकेन यूतिशब्दे परे ओकारस्य अवादेशे कृते 'ग् अव् यूतिः' इति स्थितौ वर्णसम्मेलने 'गव्यूतिः' इति रूपं निष्पन्नम्।

विशेषः – गव्यूतिः इति क्रोशद्वयस्य वाचकः। क्रोशद्वयस्य अध्वपरिमाणविशेषत्वात्

गव्यूतिशब्दस्यापि मार्गपरिमाणवाचकत्वमेव।

२५. गुणसंज्ञाविधायकं सूत्रम् एतत्। अत् = ह्रस्वः अकारः एङ् = ए ओ इति च गुणसंज्ञका भवन्ति, अर्थात् 'अ' ए ओ इति वर्णत्रयम् अस्मिन् शास्त्रे 'गुणः' उच्यते। एषां त्रयाणां वर्णानां गुणसंज्ञा अस्ति इति भावः। गुणेन एषाम् एव ग्रहणं भविष्यति इति तात्पर्यम्।

अत्र प्रश्नः 'अदेङ् गुणः' इत्यत्र 'अत्' इत्येवं तकारसहितस्य अकारस्य ग्रहणं किमर्थम् ? कथन्न 'अ एङ् गुणः' इत्येवं सूत्रं रचितम् ? अतः उत्तरति सूत्रद्वारा – 'तपरस्तत्कालस्य' इति

२६. 'तपरः तत्कालस्य' इतिच्छेदः। तपरः इति पदे द्वौ समासौ बहुव्रीहिः तत्पुरुषश्च। तः परः यस्मात् स तपरः, बहुव्रीहिः अयम्। तात्परः तपरः इति पञ्चमीतत्पुरुषः। इत्थं तपरशब्दस्य अर्थद्वयं भवति तः परः यस्मात् सः, तात्परश्च यः, स तत्कालस्य संज्ञा = बोधकः भवति। तत्कालस्य इत्युक्तेःकिम् ? तपरत्वेन उच्चार्यमाणः यः वर्णः, तस्य यः कालः, तत्कालेन सदृशः कालः यस्य, तस्यैव तपरः संज्ञा इति। यथा 'अदेङ् गुणः' इत्यत्र 'अ' इति तपरः, तः परः यस्मात् इति बहुव्रीहिं समाश्रित्य तथा एङ् इत्यपि तपरः, तात्परः इति तत्पुरुषमाधारीकृत्य। अतः 'अ' इति तपरः, स्वसमानकालस्यैव बोधकः। अस्य च एकमात्रिकत्वात् ह्रस्वसंज्ञकत्वात्, अयम् अकार ह्रस्वमूलकानां षण्णाम् एव अकारादीनां बोधकः अतः ह्रस्व अकार एव गुणसंज्ञकः, न पुनः दीर्घप्लुतौ अपि। एवमेव 'एङ् इति अपि तपरः। अतः स अपि स्वसमकालस्य एव संज्ञा। अत्र च एङ् इति 'ए ओ' द्वौ वर्णौ। एतौ ह्रस्वौ न भवतः,

२७. **आद्गुणः ६/१/८७**

अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। उपेन्द्रः। गङ्गोदकम्।

२८. **उपदेशेऽजनुनासिक इत् १/३/२**

उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात्। प्रतिज्ञानुनासिक्याः पाणिनीयाः।लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा।।

स्वभावतः दीर्घौ। अनयोः तपरत्वात् एतौ दीर्घाणाम् षण्णां भेदानां बोधकौ, न प्लुतानामपि। अतः दीर्घयोः एव 'ए ओ' इत्यनयोः गुणसंज्ञा, न प्लुतयोः इति व्यवस्था। एषा च व्यवस्था तपरत्वेन एव विहिता। यदि हि अत्र सूत्रे तपरत्वं नाकरिष्यत् तदा तु 'अणुदित्सवर्णस्य चाप्रत्ययः' इति सूत्रदिशा अकारेण अष्टादशानां ग्रहणात् आकारस्यापि गुणसंज्ञा, एङ् इत्यनेन च द्वादशानां ग्रहणात् ए ओ प्लुतयोः अपि गुणसंज्ञा अभविष्यत् इति भावः।

२७. आत् इति 'अ' इत्यस्य पञ्चम्येकवचनम्। 'अ' इति अविधीयमानत्वात् सवर्णान् ग्राहयति अतः अकारात् आकारात् च अचि परे पूर्वपरयोः (पूर्वस्य अकारस्य परस्य च अचः) स्थाने गुणरूपः एकादेशः भवतिः। एकादेशः इत्युक्तेः द्वयोः स्वरयोः स्थाने एकःस्वर भवति। स च किं रूपः ? अत उच्यते गुणरूपः। गुणः किं रूपः? अ ए ओ इत्येतेषु अन्यतमरूपः 'अदेङ्गुणः' इति सूत्रात्।

उदाहरणविश्लेषणम् –

उप+इन्द्रः = उपेन्द्रः। गङ्गा + उदकं=गङ्गोदकम्। उप+इन्द्रः इत्यत्र ''आद्गुणः'' इत्यनेन गुणः विधीयते। कयोः स्थाने ? पूर्वपरयोः। कौ पूर्वपरौ ? पकारोत्तरवर्ती अकारः इन्द्रशब्दस्य आदौ स्थितः इकारश्च पूर्वपरौ, तयोः स्थाने गुणरूपःएकादेशः विधेयः। 'अदेङ् गुणः' इति सूत्रात् 'अ ए ओ' इति गुणसंज्ञकं वर्णत्रयम्। अत्र पूर्वपरयोः स्थाने एषु त्रिषु कतमः गुणः स्यात् ? इति प्रश्ने 'स्थानेऽन्तरतमः' इति सूत्रानुसारं सदृशतमः आदेशः स्यात्, इत्युत्तरम्। अत्र हि पूर्वपरयोः स्थानिनोः अकार – इकारयोः क्रमशः कण्ठः तालु इति उच्चारणस्थाने स्तः। प्रसङ्गप्राप्तेषु गुणसंज्ञकेषु 'ए' इत्यस्य कण्ठतालु स्थानम्। अतः ताभ्यां स्थानिभ्यां तुल्यः एकाररूपः गुणः एव भवति अतः उप् (अ+इ = ए)न्द्रः = उपेन्द्रः इत्येवं रूपम् निष्पद्यते। गङ्गोदकम् इत्यत्र गङ्गा+उदकम् इति पदच्छेदे आकार–उकारयोः क्रमशः कण्ठः औष्ठौ च स्थाने स्तः, गुणसंज्ञकेषु च ओकारस्य कण्ठोष्ठस्थानत्वात् तयोः स्थाने ओकाररूपः गुणैकादेशः भवति।

रूपसिद्धिलेखनप्रकारः –

उपेन्द्रः – उप+इन्द्रः इत्यत्र ''अदेङ्गुणः'' इति सूत्रेण 'अ ए ओ' इत्येतेषां गुणसंज्ञायां कृतायाम् ''आद्गुणः'' इति सूत्रेण पकारोत्तरवर्तिनः अकारस्य इन्द्रशब्दगतस्य इकारस्य च स्थाने एकाररूपे गुणे एकादेशे (एकाररूपगुणैकादेशे) कृते उप् ए न्द्रः = उपेन्द्रः इति सिद्धम्।

अन्यानि उदाहरणानि –

रमा+ईशः = रमेशः, गण+ईशः=गणेशः, महा+ईशः=महेशः महेन्द्रः, नरेन्द्रः, महा+उपाध्यायः = महोपाध्यायः, कुल+उद्भवः = कुलोद्भवः, कुल+उत्पन्नः = कुलोत्पन्नः, जल+उद्गमः = जलोद्गमः। पर्व+उत्सवः= पर्वोत्सवः, विवाहोत्सवः इत्यादीनि।

२८ **उपदेशे अच् अनुनासिक इत्** इतिच्छेदः। उपदेशः आद्योच्चारणम् इति 'हलन्त्यम्' इति सूत्रे प्रपञ्चितम्। उपदेशे य अनुनासिकः अच् स इत्संज्ञः भवति इति सूत्रार्थः। आद्याः पाणिन्यादयः क्व क्व अचः अनुनासिकान् कृतवन्तः ? कथञ्च आधुनिकैः ज्ञातुं शक्यते यदसौ अच् अनुनासिक इति? अत आह – 'प्रतिज्ञानुनासिक्याः पाणिनीयाः' इति। अर्थात् गुरुशिष्यपरम्परया ज्ञायते यदयमच् अनुनासिकः, अयञ्च अननुनासिकः इति। परम्परागतःयेषाम् अचाम् इत्संज्ञा लोपश्च क्रियमाण अस्ति, ते वर्णाः पाणिनिना प्रोक्ताः अनुनासिकधर्मवन्तः सन्तीति अभ्युपगच्छन्ति आधुनिकाः इति भावः।लण् इति षष्ठे माहेश्वरसूत्रे लकारात्परः यः अकारः तस्य अनुनासिकत्वप्रतिज्ञया इत्संज्ञां

२९. उरण् रपरः १/१/९१

ऋ इति त्रिंशतः संज्ञेत्युक्तम्। तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते। कृष्णर्द्धिः। तवल्कारः।

३०. लोपःशाकल्यस्य ८/३/१९

अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वाऽशि परे।

विधाय ('उपदेशेऽजनुनासिक इत्' सूत्रेण) तेन इता सह उच्चार्यमाणः हयवरट् सूत्रस्थः 'र् अ' इत्येवं रकारः (रप्रत्याहारः) मध्यगस्य लस्य, स्वस्य च संज्ञा=बोधकः सन् र् ल् इति वर्णद्वयं ग्राहयति। अर्थात् र ग्रहणेन रकारस्य लकारस्य च उभयस्य ग्रहणं भवति इत्याशयः।

२९. ऋ इति वर्णस्य षष्ठ्येकवचने उः इति रुपम्। उः अण् रपरः इति सूत्रस्य पदच्छेदः। रः परः यस्मात् सः रपरः। ऋ इति त्रिंशद्भेदानां संज्ञा इति पूर्वमुक्तम् अस्ति। अष्टादशभेदाः ऋकारस्य, द्वादश लृकारस्य। तयोः ऋलृवर्णयोः सावर्ण्यात् ऋकारः आत्मनः, सवर्णिनश्च लृकारस्य आहत्य त्रिंशद्भेदान् ग्राहयति। अतः ऋस्थाने (लृस्थाने च) यस्य अणः (अ इ उ) विधानं भवति, स अण् रपरः सन् तत्र प्रवर्तते। रपरः इत्यत्र 'र' इति पूर्वोक्तदिशा प्रत्याहारः रलयोः बोधकः। अतः ऋस्थाने विधीयमानः अण् रपरः भवति, लृकारस्य स्थाने विधीयमानः अण् लपरः भवति इति व्यवस्था।

उदाहरणविश्लेषणम् -

कृष्ण + ऋद्धिः इत्यत्र 'आद्गुणः' इत्यनेन अकारऋकारयोः स्थाने विधीयमानः अकाररूपः गुणैकादेशः ऋकारस्य स्थाने विधीयमानत्वात् रपरः सन् कृष्ण् अर् द्धि इत्येवं प्रवर्तते, वर्णसम्मेलने रेफस्य च जलतुम्बिकान्यायेन ऊर्ध्वगमने कृष्णर्द्धिः इति सिद्धिः भवति। एवमेव

तव+लृकारः इत्यत्र ऋकारेण लृकारस्य अपि सावर्ण्यवशात् ग्रहणेन गुणैकादेशे अकाररूपे तव् अ कारः इत्यत्र 'उरण् रपरः' इत्यनेन रकारेण लकारस्यापि ग्रहणात् लपरत्वे तव् अल् कारः इति जाते वर्ण सम्मेलने तवल्कारः इति रूपं सिध्यति।

रूपसिद्धिलेखनप्रकारः -

१. कृष्णर्द्धिः -

कृष्ण+ऋद्धिः इत्यत्र "अदेङ् गुणः" इत्यनेन 'अ ए ओ' इति वर्णत्रयस्य गुणसंज्ञात्वात् 'आद्गुणः' इति सूत्रेण णकारोत्तरवर्तिनः अकारस्य ऋद्धिशब्दगतस्य ऋकारस्य च स्थाने अकाररूपे गुणैकादेशे " "उरण् रपरः" इति सूत्रेण रपरत्वे च कृते कृष्ण्अर् द्धिः इत्यवस्थायां वर्णसम्मेलने रेफस्य जलतुम्बिकान्यायेन ऊर्ध्वगमने 'कृष्णर्द्धिः' इति सिद्धम्।

२. तवल्कारः-

तव+लृकारः इत्यत्र 'आद्गुणः' इति सूत्रेण वकारोत्तरवर्तिनः अकारस्य लृकारस्य च उभयोः स्थाने 'अ ए ओ' इति गुणसंज्ञकेषु अकाररूपे गुणैकादेशे "उरण् रपरः" इति सूत्रेण लपरत्वे तव् अल् कारः वर्णसम्मेलने च कृते तवल्कारः इति रूपं निष्पन्नम्।

अन्यानि उदाहरणानि -

देव+ऋषिः = देवर्षिः। महा+ऋषिः = महर्षिः। ग्रीष्म + ऋतुः = ग्रीष्मर्तुः। सप्त + ऋषयः = सप्तर्षयः। मम+लृकारः ममल्कारः। ह्रस्वस्य + लृकारस्य = ह्रस्वस्यल्कारस्य

३०. पदस्य अन्ते स्थितयोः अवर्णपूर्वयोः यकारवकारयोः अशि परे शाकल्यस्य मते लोपः भवति। अश् इति प्रत्याहारः अइउण् इत्यकारादारभ्य जबगडदश् इति शकारं यावत्। पाणिनिमते तु लोपः न भवति, अतः वैकल्पिकः अयं लोपः। यथा हरे+इह, विष्णो + इह इत्यत्र "एचोऽयवायावः" इति क्रमशः अयादेशे अवादेशे हरय् + इह, विष्णव् + इह इत्यवस्थायां पदान्तयोः अवर्णपूर्वकयोः यवयोः विभाषया लोपः भवति अश्परकत्वात्। इह इत्यत्र इ इति अश्। जाते च तयोः लोपे हर इह, विष्ण इह इति स्थितिः, अत्र "आद्गुणः" इति गुणः प्राप्तः अवर्णात् परे अचः स्थितत्वात्। किन्तु गुणः न भवति, किं कारणं न भवति ? अत आह - पूर्वत्रासिद्धमिति।

३१. **पूर्वत्रासिद्धम् ८/२/१**
सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम्। हर इह, हरयिह। विष्ण इह, विष्णविह।

३२. **वृद्धिरादैच् १/१/१**
आदैच्च वृद्धिसंज्ञः स्यात्।

३३. **वृद्धिरेचि ६/१/८८**
आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्णैकत्वम्। गङ्गौघः।देवैश्वर्यम्। कृष्णौत्कण्ठ्यम्।

---

३१. **पूर्वत्रासिद्धम्** – अष्टाध्याय्याम् अष्टौ अध्यायाः सन्ति। तत्र अष्टमाध्यायस्य प्रथमपादं यावत् सपादसप्ताध्यायी इति उच्यते। अन्तिमं पादत्रयं त्रिपादी इति कथ्यते। सपादसप्ताध्यायीस्थं सूत्रं प्रति त्रिपादीस्थं शास्त्रं = सूत्रम् असिद्ध भवति। अर्थात् त्रिपादीसूत्रेण विहितमपि कार्यं सपादसप्ताध्यायीस्थसूत्रदृष्ट्या अनस्तित्ववद् भवति। त्रिपाद्यामपि पूर्वतनं सूत्रं प्रति परं सूत्रमसिद्धं भवति। अतः अष्टाध्याय्याः अन्तिमं सूत्रं सर्वेषां सूत्राणां दृष्ट्या असिद्धम्।हर इह, विष्ण इह इत्यत्र यकारवकारयोः लोपविधायकस्य ''लोपः

शाकल्यस्य'' सूत्रस्य त्रिपादीस्थत्वात् सप्तादसप्ताध्यायीस्थम् ''आद्गुणः'' इति सूत्रं प्रति असिद्धत्वात् यलोपे वलोपे जाते अपि गुणः न भवति,'आद्गुणः' इति दृष्ट्या यकारवकारयोः तत्र स्थितत्वात् – (अस्तीति भावनया) अवर्णात् परतःअचः अभावात्। यत्र च पक्षे यकारवकारयोः लोपः न भवति, तस्मिन् पाणिनिपक्षे हरयिह, विष्णविह इति स्थितिः।

रूपसिद्धिलेखनप्रकारः –

हरे इह इत्यत्र ''एचोऽयवायाव'' इति सूत्रेण पदान्ते स्थितस्य एकारस्य अयादेशे कृते हरय् + इह इति जाते सति ''लोपः शाकल्यस्य'' इति सूत्रेण अपूर्वकस्य पदान्तस्य यकारस्य विकल्पेन लोपे कृते हर इह इति स्थिते ''आद्गुणः इति सूत्रेण अकार-इकारयोः गुणैकादेशः तु न भवति, 'लोपःशाकल्यस्य' इति सूत्रस्य त्रैपादिकत्वात् तत्कृतस्य य्लोपस्य 'आद्गुणः' इति सपादसप्ताध्यायीस्थसूत्रं प्रति असिद्धत्वात्, अतः हर इह इति रूपम्। यलोपाभावपक्षे तु हरयिह इति रूपं सिद्धम्। एवमेव – विष्णो + इह – विष्णव् + इह – विष्णइह, विष्णविह।

अन्यानि उदाहरणानि –

वर्धते+एव = वर्धत एव, वर्धतयेव। लक्ष्म्यै+उद्यतः=लक्ष्म्या उद्यतः, लक्ष्म्यायुद्यतः। गुरौ+आदरः = गुरा आदरः गुरावादरः। विधौ+उदिते = विधा उदिते, विधावुदिते इत्यादीनि।

३२. वृद्धिसंज्ञासूत्रम् इदम्। आत् ऐच् (आ ऐ औ) इति वर्णानां वृद्धिसंज्ञा भवति। ऐच् इति प्रत्याहारः। अत्र तपरकरणात् 'आ' इति, ऐच् (ऐऔ) इति च समकालस्यैव संज्ञा। अतः दीर्घस्य आकारस्य, वृद्धिसंज्ञा भवति, न तु ह्रस्वप्लुतयोः अकारयोः, न च प्लुतयोः ऐकारौकारयोः इति फलितम्।

३३. **वृद्धिरेचि** – आत् (अवर्णात्) एचि परे पूर्वपरयोः स्थाने वृद्धिरूपः (आ, ऐ औ इत्येतेषु अन्यतमरूपः) एकादेशः भवति। अवर्णात् अचि परे गुणः भवति (आद्गुणः)। एच् अपि अजन्तर्गतः अतः एचि परे अपि गुणः अपि प्राप्नोति, किन्तु वृद्धिः गुणापवादः।

उदाहरणस्य विश्लेषणम् –

कृष्ण+एकत्वम् इत्यत्र णकारोत्तरवर्तिनः अकारात् परः एकाररूपः एच् वर्तते, उभयोः स्थाने 'ऐ' इति वृद्धि रूपः एकादेशः भवति, अतः कृष्णैकत्वम् इति रूपम्। एवमेव गङ्गा+ओघः इत्यत्र अकारस्य ओकारस्य च स्थाने 'औ' इति वृद्धिः। देव+ऐश्वर्यम् इत्यत्र अ+ऐ = ऐ आदेशे, देवैश्वर्यम् तथा कृष्ण+औत्कण्ठ्यम् इत्यत्र अ+औ = औ आदेशे 'कृष्णौत्कण्ठ्यम्' इति रूपं निष्पद्यते।

३४. एत्येधत्यूठ्सु ६/१/८९

अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्।उपैति। उपैधते। प्रष्ठौहः। एजाद्योः किम् ? उपेतः। मा भवान् प्रेदिधत्। (अक्षादूहिन्यामुपसंख्यानम्) अक्षौहिणी सेना। (प्रादूहोढोढ्येषैष्येषु)। प्रौहः, प्रौढः, प्रौढिः, प्रैषः, प्रैष्यः। (ऋते च तृतीयासमासे)। सुखेन ऋतः सुखार्तः। तृतीयेति किम् ? परमर्तः। (प्रवत्सतरकम्बलवसनार्णदशानामृणे)। प्रार्णम्, वत्सतरार्णम् इत्यादि।

रूपसिद्धिलेखनप्रकार :

कृष्णैकत्वम् – कृष्ण+एकत्वम् इत्यत्र 'वृद्धिरादैच्' इति सूत्रेण 'आ ऐ औ' इत्येषां वृद्धिसंज्ञायां कृतायां ''वृद्धिरेचि'' इति सूत्रेण (णकारोत्तरवर्तिनः अकारस्य ततः परस्य एकारस्य च इत्येवम् उभयोः) पूर्वपरयोः स्थाने आन्तरतम्यात् = सदृशतमत्वात् ऐकाररूपे वृद्ध्येकादेशे कृते कृष्ण् + ऐ + कत्वम् इति जाते वर्णसम्मेलने च कृते 'कृष्णैकत्वम्' इति रूपं सिद्धम्।

कृष्णौत्कण्ठ्यम् –

कृष्ण+औत्कण्ठ्यम् इत्यत्र वृद्धिसंज्ञायां ''वृद्धिरेचि'' इति सूत्रेण अकार-औकारयोः पूर्वपरयोः स्थाने सादृश्यात् औकाररूपे वृद्ध्येकादेशे कृष्ण्+औ+त्कण्ठ्यम् इत्यवस्थायां वर्णसंयोजने कृते ''कृष्णौत्कण्ठ्यम्'' इति रूपं सिद्धम्।

अन्यानि उदाहरणानि –

जन+एकता = जनैकता, धन+एषणा = धनैषणा। शाल्य + ओदनः = शाल्यौदनः। विप्र + ऐक्यम् = विप्रैक्यम्। मत+ऐक्यम् = मतैक्यम्। धार्मिक + ऐतिहासिकम् = धार्मिकैतिहासिकम्। तव+औदासीन्यम् = तवौदासीन्यम्। अस्य + औत्सर्गिकत्वम् = अस्यौत्सर्गिकत्वम्।

३४. एति+एधति+ऊठ्सु इतिच्छेदः। एति, एधति इति क्रमशः इण् धातोः एध धातोः श्तिपा निर्देशः, न तु तिङन्तं रूपम्। तिङन्ते तु एधते इति आत्मनेपदम्। ऊठ् इति सम्प्रसारणरूपम्। अत्र 'वृद्धिरेचि' इति पूर्वसूत्रात् 'एचि' इति, 'आद्गुणः' सूत्रात् 'आत्' इति च अनुवर्तते। एचि इति इणेधोः धात्वोः विशेषणम्। अतः अवर्णात् एजादौ इण्धातौ परे, एजादौ एधधातौ ऊठि च परे पूर्वपरयोः वृद्धिरेकादेशः भवति इति सूत्रार्थः फलितः।

उदाहरणस्य विश्लेषणम् –

उप+एति, उप + एधते इत्यत्र अवर्णात् परेः क्रमशः एजादिः इण्धातुः, एजादिः एधधातुश्च वर्तते। अत्र 'एङि पररूपम्' इति प्राप्तं पररूपं प्रबाध्य पूर्वपरयोः अकार-एकारयोः स्थाने आन्तरतम्यात् ऐकाररूपः वृद्ध्येकादेशः भवति। अतः उपैति, उपैधते इति रूपे सिध्यतः। ऊठः उदाहरणं तु प्रष्ठौहः इति। अत्र हि प्रष्ठ+ऊहः इत्यत्र पूर्वपरयोः आन्तरतम्यात् औकाररूपवृद्धिः भवति।

अत्र प्रश्नः – इणेधधात्वोः एज् (एजादि) इति विशेषणं किमर्थम् (एजाद्योः किम्) ? उत्तरति-एजादौ इति विशेषणाभावे, यत्र एतौ धातू एजादी न स्तः, तत्रापि वृद्धिः प्राप्नोति। सा च वृद्धिः तत्र न स्यात्, एतदर्थं विशेषणम्। क्व एतौ एजादी न स्तः ? उप+इतः, मा भवान् प्र+इदिधत् इत्यत्र एतौ एजादी न स्तः। अत्र क्रमशः इणः लटि प्रथमपुरुषद्विवचने रूपम्, ण्यन्तस्य एधः लुङि प्र.पु. एकवचने रूपम्। कृते विशेषणे तु उक्तप्रयोगयोः एजादित्वाभावात् वृद्धिः न भवति। अतः गुणैकादेशे उपेतः, प्रेदिधत् इति रूपे स्तः।

वार्तिकम् –

(अक्षादूहिन्यामुपसंख्यानम्) – अक्षशब्दात् 'ऊहिनी' शब्दे परे वृद्धिः भवति इति वक्तव्यम्। अक्ष+ऊहिनी इत्यवस्थायाम् अकारात् अचि परे 'आद्गुणः' इति गुणस्य प्राप्तिः, स च गुणः न स्यात् अतः विशेषवचनम् एतत्। गुणः किमर्थं न स्यात् ? सति गुणे का हानिः ? अत्र वक्तव्यम् – वाङ्मये तादृशं रूपं न मिलति। यद्रूपं मिलति तत् 'अक्षौहिणी'

३५. **उपसर्गाः क्रियायोगे १/४/५९**
प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः।

३६. **भूवादयो धातवः १/३/१**
क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः।

इति वर्तते। एतदर्थं वृद्ध्यर्थं विशेषवचनरूपं वार्तिकं कृतमिति भावः।

वार्तिकम् -

प्रादूहोढो. इति। 'प्र' इत्यस्मात् ऊहः, ऊढः, ऊढिः एषः, एष्यः, इत्येतेषु शब्देषु परेषु पूर्वपरयोः वृद्धि : एकादेशः स्यात् इति वक्तव्यम्। प्र+ऊहः, प्र+ऊढः, प्र+ऊढिः इत्यत्र 'आद्गुणः' इति गुणः प्राप्तः, तं बाधितुं वृद्ध्यर्थं विशेषवचनम्। प्र+एषः, प्र+एष्यः इत्यत्र 'एङिपररूपम्' इति पररूपस्य प्राप्तिः आसीत्, तस्य बाधनाय च एतद्वार्तिकरूपं विशेषवचनम्। अतः उक्त स्थलेषु पूर्वपरयोः वृद्ध्येकादेशे क्रमशः प्रौहः, प्रौढः, प्रौढिः, प्रैषः, प्रैष्यः इति रूपाणि सिध्यन्ति।

वार्तिकम् -

'ऋते च.' इति। तृतीयातत्पुरुषसमासे अवर्णात् ऋत इति शब्दे परे पूर्वपरयोः वृद्धिः स्यात्। सुखेन ऋतः सुखार्तः इत्युदाहरणम्। 'सुख+ऋतः' इत्यत्र प्राप्तं गुणं बाधितुं वार्तिकमेतत्। अस्य अभावे तु गुण एव स्यात्। **अत्र अयं प्रश्नः**-तृतीयासमासे इति किमर्थम् उच्यते? कथन्न समासे इत्येवम् उच्यते? उत्तरम्-तृतीया इति कथनस्य अभावे यस्मिन् कस्मिन् अपि समासे अवर्णात् ऋत शब्दे परे सति गुणं प्रबाध्य वृद्धिः एव स्यात्, तादृशीं स्थितिं वारयितुं तृतीयासमासे इत्युक्तम्। परमश्चासौ ऋतश्च इति कर्मधारये परम+ऋतः इत्यत्रापि अवर्णात् ऋतस्य परत्वात् वृद्धिः न भवेत् एतदर्थं तृतीयासमासे इति वचनम्। अत्र च तृतीयासमासत्वाभावात् नास्य वार्तिकस्य प्रवृत्तिः भवति। अतः पूर्वपरयोः गुणैकादेशे रपरत्वे च कृते 'परमर्तः' इति रूपं सिध्यति। तृतीयासमासे तु वृद्धि :, अतः 'सुखार्तः' इति रूपम्।

वार्तिकम् -

''प्रवत्सतर.'' इति। प्र, वत्सतर, कम्बल, वसन, ऋण, दश इति एतेभ्यः अकारान्तेभ्यः ऋणशब्दे परे वृद्धिः स्यात् इति वक्तव्यम्। प्र+ऋणम्, वत्सतर+ऋणम् इत्यादौ 'आद्गुणः' इति गुणः प्राप्तः, तं प्रबाध्य अनेन वार्तिकेन पूर्वपरयोः स्थाने आन्तरतम्यात् आकाररूपे वृद्ध्येकादेशे रपरत्वे च विहिते प्रार्णम्, वत्सतरार्णम्, कम्बलार्णम्, वसनार्णम्, ऋण+ऋणम्=ऋणार्णम्, दशार्णम् इति रूपाणि निष्पद्यन्ते।

अन्यानि उदाहरणानि -

प्र+एति=प्रैति। प्र+एधाञ्चक्रे=प्रैधाञ्चक्रे। प्र+एधताम्=प्रैधताम्। विश्व+ऊहः = विश्वौहः। प्र + ऐधत = प्रैधत, प्र + एधिषीष्ट = प्रैधिषीष्ट इत्यादीनि।

३५. वृद्धिप्रसङ्गे ''उपसर्गादृति धातौ'' इत्यत्र, पररूपप्रसङ्गे च 'एङि पररूपम्' इत्यादौ च धातोः उपसर्गस्य च कार्यविषयत्वात्, तत्र कः उपसर्गसंज्ञकः, कश्च धातुसंज्ञकः इति संभविष्यज्जिज्ञासायामाह - ''उपसर्गाः क्रियायोगे'' इति - अद्रव्यार्थकाः प्रादयः निपाताः क्रियायोगे = क्रियया अन्वये (सम्बन्धे) सति उपसर्गसंज्ञकाः भवन्ति। के प्रादयः ? इति जिज्ञासायामाह - प्र परा इत्यादयः द्वाविंशतिः प्रादयः।

३६. **भूवादयो धातवः** - क्रियावाचिनः भ्वादयः धातुसंज्ञकाः भवन्ति। भूश्च वाश्च इति भूवौ। आदिश्च आदिश्च इति आदी। भूवौ आदी येषां ते भूवादयः। अत्र प्रथमः आदिशब्दः प्रभृतिवाचकः तस्य च भूशब्देन सम्बन्ध :।द्वितीयश्च आदिशब्दः प्रकारवाचकः (सादृश्यवाचकः) तस्य च वा शब्देन सह सम्बन्धः। अतः वासदृशाः क्रियावाचकाः भूप्रभृतयः धातुसंज्ञकाः भवन्ति इति सूत्रार्थः फलितः। क्रियावाचकाः धातुसंज्ञका भवन्ति, अतः विकल्पार्थकस्य वा शब्दस्य पृथिवीवाचकस्य भूशब्दस्य च धातुसंज्ञा न भवति, अनयोः क्रियावाचकत्वाभावात्।

३७. **उपसर्गादृति धातौ ६/१/९१**
अवर्णान्तादुपसर्गाद् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। प्रार्च्छति।

३८. **एङि पररूपम् ६/१/९४**
आदुपसर्गाद् एङादौ धातौ परे पररूपमेकादेशः स्यात्। प्रेजते। उपोषति।

३९. **अचोऽन्त्यादि टि १/१/६४**
अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् (शकन्ध्वादिषु पररूपं वाच्यम्) तच्च टेः। शकन्धुः। कर्कन्धुः। मनीषा। आकृतिगणोऽयम्। मार्तण्डः।

---

३७. प्रादिषु उपसर्गेषु ये अकारान्ताः प्र, अप, अव इत्यादयः। तादृशात् अवर्णान्तात् उपसर्गाद् ऋकारादौ धातौ परे पूर्वपरयोः वृद्ध्येकादेशः स्यात् ऋकारादौ धातौ परे सति इति सूत्रार्थः। । तद्यथा 'प्र+ऋच्छति' इत्यत्र 'प्र' इत्यस्य क्रियायोगात् उपसर्गसंज्ञा, ऋच्छति इत्यस्य क्रियावाचकत्वात् धातु संज्ञा अस्ति। अयञ्च उपसर्गः अकारान्तः, धातुश्च यः उपसर्गात्परः स ऋकारादिः वर्तते। अतः अत्र पूर्वपरयोः स्थाने आकाररूपे वृद्ध्येकादेशे रपरत्वे च प्रार्च्छति इति रूपम्।

रूपलेखनप्रकारः -

प्र+ऋच्छति इत्यत्र 'ऋच्छति' इत्यस्य क्रियावाचकत्वात् -भूवादयो धातवः' इति सूत्रेण धातुसंज्ञायां क्रियायोगाच्च ''उपसर्गाः क्रियायोगे' इति सूत्रेण 'प्र' इत्यस्य उपसर्गसंज्ञायाञ्च कृतायाम् ''आद्गुणः'' इति गुणे प्राप्ते तं प्रबाध्य ''उपसर्गादृति धातौ'' इति सूत्रेण पूर्वपरयोः (उपसर्गस्थ-अकारस्य धातोः आदौ स्थितस्य ऋकारस्य च) स्थाने आकाररूपवृद्ध्येकादेशे 'उरण् रपरः' इत्यनेन रपरत्वे च कृते प्र्+आर्+च्छति इत्यत्र वर्णसम्मेलने च कृते 'प्रार्च्छति' इति रूपं सिद्धम्।

अन्यानि उदाहरणानि :- उपार्च्छति इत्यादीनि।

३८. अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पूर्वपरयोः स्थाने पररूपमेकादेशः स्यात्। एतादृशे स्थले यद्यपि ''वृद्धिरेचि'' इति सूत्रेण वृद्धेः प्राप्तिः भवति तथापि एङादौ धातौ तु पररूपं भवति, न वृद्धिरिति स्थितिः।

उदाहरणस्य विश्लेषणम् -

प्र+एजते, उप+ओषति इत्यत्र क्रमशः प्र, उप इत्येतौ अकारान्तौ उपसर्गौ स्तः, ततः परौ क्रमशः एजते, ओषति इति एङादी धातू स्तः। अत्र एचि परे 'वृद्धिरेचि' इति वृद्धेः प्राप्तिः भवति तथापि अनयोः एङादिधातुत्वात् अनेन विशेषसूत्रेण (अपवादेन) परस्य यद् रूपं, तत् पूर्वपरयोः स्थाने एकादेशत्वेन आदिश्यते। अतः प्रेजते, उपोषति इति रूपं भवति (न तु प्रैजते, उपौषति इति)।

रूपलेखनप्रकारः -

प्र+एजते इत्यत्र 'एजते' इत्यस्य क्रियावाचकत्वात् 'भूवादयो धातवः' इत्यनेन धातुसंज्ञायां क्रियायोगात् 'प्र' इत्यस्य ''उपसर्गाः क्रियायोगे'' इत्यनेन उपसर्गसंज्ञायाम् ''वृद्धिरेचि'' इति सूत्रेण वृद्ध्येकादेशे प्राप्ते तम्प्रबाध्य ''एङि पररूपम्' इति सूत्रेण पूर्वपरयोः स्थाने पररूपैकादेशत्वेन एकारे कृते 'प्रेजते' इति रूपं सिद्धम्। एवमेव उपोषति इत्यपि ज्ञेयम्।

अन्यानि उदाहरणानि-

प्र+एजाञ्चक्रे = प्रेजाञ्चक्रे। प्र+एजति (कम्पने) = प्रेजति। प्र+ओणति = प्रोणति, प्रोणाञ्चकार (ओणृ अपनयने) इत्यादीनि।

३९. **अचः अन्त्यादि टि** इतिच्छेदः। 'अचः' इति निर्धारणे षष्ठी, जातौ एकवचनम्। वर्णसमुदाये शब्दे यावन्तः अचः भवन्ति, तेषाम् अचां मध्ये यः अन्तिमः अच्, सः अन्तिमाच् यस्य समुदायस्य आदिः, स समुदायः (अज्झल्समुदायः अज्रूपः वा समुदायः) टिसंज्ञकः भवति। यथा 'मनस्' इति शब्दे अज्द्वयम् अस्ति, तत्र अन्त्यः अच् नकारोत्तरवर्ती

४०. ओमाङोश्च ६।१।९५

ओमि आङि चात्परे पररूपमेकादेशः स्यात्। शिवायोन्नमः। शिव+एहि।

अकाररूपः, स च 'अस्' इति समुदायस्य आदिः, अतः 'अस्' इति टिसंज्ञकम्।

वार्तिकम् -

'शकन्ध्वादिषु.' इति। 'शकन्धुः' इत्यादिषु (शकन्ध्वादिगणपठितेषु) टेः पररूपं वक्तव्यम् इति वार्तिकाशयः। अत आह - तच्च टेः इति। अर्थात् पूर्वस्य टेः, परस्य च आदिस्वरस्य, इत्येवं पूर्वपरयोः स्थाने पररूपमेकादेशः भवति इति भावः। तद्यथा - शक+अन्धुः कर्क+अन्धुः इत्यत्र शक इत्यत्र ककारोत्तरवर्ती अकारः टिसंज्ञकः, कर्क इत्यत्रापि तथैव, अत्र अकाररूपात् टेः परः अन्धुः इत्यस्य अकार एव, अतः सवर्णदीर्घः प्राप्तः, तं प्रबाध्य अनेन वार्तिकेन पररूपे शकन्धुः, कर्कन्धुः इति रूपम्। मनस्+ईषा इत्यत्र असः टिसंज्ञकत्वात् ततः परस्य ईकारस्य टेश्च स्थाने पररूपे मनीषा इति रूपम्। अत्र ज्ञेयम्-परस्य यद्रूपं भवति, तस्य एव रूपं पूर्वपरयोः स्थाने भवति, अतः पूर्वस्य रूपम् आत्मानं परस्य रूपे लीनं करोति इति भावः। 'अस्' इति 'ई' इत्यत्र लीनम्, अतः मन् (अस्+ई = ई) षा = मनीषा इति।

आकृतिगणोऽयम् इति -

आकृत्या स्वरूपेण गण्यते परिचीयते इत्याकृतिगणः। अर्थात् एवंविधाः शब्दाः लोके प्रयुक्ताः सन्तः अत्र गणे निवेशनीयाः इति। मृतम् अण्डं यस्य स मृतण्डः। मृत+अण्डः इत्यत्र प्राप्तसवर्णदीर्घं प्रबाध्य अनेन वार्तिकेन पररूपे मृतण्डः इति रूपम्। मृतण्डस्य अपत्यं पुमान् मार्तण्डः। मृतण्ड शब्दस्य अत्र निवेशः आकृतिगणत्वात् बोध्यः।

रूपलेखनप्रकारः -

कर्कन्धुः - कर्क+अन्धुः इत्यत्र ककारोत्तरवर्तिनः अकारस्य ''अचोऽन्त्यादि टि'' इति सूत्रेण टिसंज्ञायां (स्वस्यैव आदित्वात्) कृतायाम् --''अकः सवर्णे दीर्घः'' इति सूत्रेण पूर्वपरयोः सवर्णदीर्घे एकादेशे प्राप्ते तं प्रबाध्य टेः 'अन्धु+' इत्यकारस्य स्थाने पररूपे एकादेशे शकन्धुः इति रूपं सिद्धम्। मनस्+ईषा इत्यत्र तु 'अस्' इति टेः ईषा इत्यत्रस्थ'ई'इत्यस्य च स्थाने पररूपे मनीषा इति रूपम्।

अन्यानि उदाहरणानि -

कुल + अटा = कुलटा। सीमन् + अन्तः = सीमन्तः। सार + अङ्गः = सारङ्गः। हल + ईषा = हलीषा। लाङ्गल + ईषा = लाङ्गलीषा। पतत् + अञ्जलिः = पतञ्जलिः इत्यादीनि।

४०. अत्र 'आद्गुणः' इत्यतः आत् इति, 'एङि पररूपम्' इत्यतश्च पररूपम् इति अनुवर्तते। अतः अवर्णात् ओमि आङि च परे पूर्वपरयोः पररूपमेकादेशः स्यादिति सूत्रार्थः। अवर्णात् ओमि परे 'वृद्धिरेचि' इति वृद्धेः प्राप्तिः भवति, सूत्रमेतत् तां वृद्धिं बाधते पररूपञ्च विधत्ते।

रूपलेखनप्रकारः -

शिवाय+ओम् नमः इत्यत्र वृद्धिसंज्ञायां ''वृद्धिरेचि'' इति सूत्रेण पूर्वपरयोः अकार-ओकारयोः स्थाने वृद्ध्येकादेशे प्राप्ते तं प्रबाध्य ''ओमाङोश्च'' इति सूत्रेण पररूपे ओकारादेशे कृते शिवायोम् नमः इति स्थिते ''मोऽनुस्वारः'' इति सूत्रेण मस्य अनुस्वारे शिवायों नमः इति जाते ''अनुस्वारस्य ययि परसवर्णः'' इति सूत्रेण अनुस्वारस्य परसवर्णे नकारे कृते शिवायोन्नमः इति रूपं सिद्धम्।

शंका - शिव+आ+इहि इत्यत्र ''शिव+आ'' इति आकार-आकरयोः 'अकः सवर्णे दीर्घः'' इति सूत्रेण सवर्णदीर्घे प्राप्ते ''आ+इहि'' इत्यत्र च ''आद्गुणः'' इति सूत्रेण आकार-इकारयोः स्थाने गुणैकादेशे च प्राप्ते द्वयोः कतरत् कार्यं प्रथमं विधेयमिति जिज्ञासायां ''धातूपसर्गयोः कार्यमन्तरङ्गम्'' इति परिभाषया अत्र गुणस्य धातूपसर्गसम्बन्धि कार्यत्वात् अन्तरङ्गत्वात् प्रथमं गुणे कृते शिव+एहि इत्यत्र वृद्धिः प्राप्ता - अत्र वृद्धिं प्रबाध्य पररूपं यथा स्यात् तथा कर्तुम् उपक्रमते - अन्तादिवच्च - इति

४१. अन्तादिवच्च ६।१।८५

योऽयमेकादेश: स पूर्वस्यान्तवत्परस्यादिवत्। शिवेहि।

४२. अक: सवर्णे दीर्घ: ६/१/१०१

अक: सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेश: स्यात्। दैत्यारि:। श्रीश:। विष्णूदय:। होतॄकार:।

---

४१. अन्तादिवत् च। य: पूर्वपरयो: स्थाने एकादेश: क्रियते, स पूर्वस्य अन्तवत् भवति, परस्य च आदिवत् भवति। यतो हि एकादेश: द्वयो: स्थानिनो: पूर्वपरयो: स्थाने भवति, तत्र एकादेशे पूर्वस्य अन्तिम: भाग:, परस्य च आदिभाग: मिलित्वा तिष्ठत:। तत्र च एकादेशे सति आवश्कत्वे पूर्वस्य अन्तवद्भावमादाय कार्यं कर्तुं शक्यते, परस्य च आदिवद्भावमादाय अपि कार्यं कर्तुं शक्यम्। यथा शर्कराचूर्णयो: मिश्रणेन निर्मिते मोदके शर्करात्वभाव: चूर्णत्वभावश्च भवत: तथैव अत्रापि बोध्यम्। प्रकृतप्रसङ्गे शिव+एहि इत्यत्र 'ए' इति एकादेश: 'आ+इ' इति द्वयो: स्थाने जात:। तत्र च एकादेशे पूर्वभाग: 'आ' इति परभागश्च 'इ' इति। सति आवश्यकत्वे एकारे पूर्वस्य 'आ' इत्यस्य अन्तवद्भाव: आनेतुं शक्य: ईकारस्य आदिवत्त्वमपि। अत्र पूर्वस्य अन्तवद्भावमादाय आङ्त्वम् आनेतव्यम्। तथा सति शिवाय इति अकारात् पर: आङ् उपलभ्यते, अत: 'ओमाङोश्च' इति सूत्रेण पररूपे कृते 'शिवेहि' इति रूपम्। इत्थम् अन्तवद्भावेन वृद्धे: बाध: सञ्जात:।

रूपलेखनप्रकार: -

शिवेहि :- शिव+आ+इहि इत्यवस्थायां 'शिव+आ' इत्यत्र ''अक: सवर्णे दीर्घ:'' इति सूत्रेण सवर्णदीर्घे एकादेशे प्राप्ते ''आ+इहि'' इत्यत्र च ''आद्गुण:'' इति गुणे प्राप्ते ''धातूपसर्गयो: कार्यमन्तरङ्गम्'' इति परिभाषया अत्र प्रयोगे गुणस्य धातूपसर्गसम्बन्धित्वात् अन्तरङ्गत्वात् प्रथमं तस्मिन् जाते शिव+एहि इति जाते 'वृद्धिरेचि' इति सूत्रेण पूर्वपरयो: वृद्ध्येकादेशे प्राप्ते, तां च वृद्धिं प्रबाध्य ''अन्तादिवच्च'' इति सूत्रेण एहि इत्यत्र एकाररूपैकादेशे पूर्वान्तवद्भावेन आङ्त्वमादाय 'ओमाङोश्च'' इति सूत्रेण पररूपे कृते 'शिवेहि' इति रूपं सिद्धम्।

४२. अक् इति प्रत्याहार:। अ इ उ ऋ लृ इति तत्र वर्णा:। एभ्य: वर्णेभ्य: सवर्णेषु स्वरेषु अर्थात् अ इ उ ऋ लृ इत्येतेषु एव परेषु पूर्वपरयो: स्थाने सवर्णदीर्घ एकादेश: भवति। अकारात् अकारे परे, इकारात् इकारे, उकारात् उकारे, ऋकारात् ऋकारे, लृकारात् लृकारे च परे, इति यावत्। एते अत्र सवर्णान् ग्राहयन्ति अविधीयमानत्वात्। अत: ऋकारलृकारयो: सावर्ण्यात् ऋकारात् लृकारे परेऽपि सवर्णदीर्घ: ॠकार: भवति, दीर्घलृकारस्तु न, तस्य दीर्घत्वाभावात्।

उदाहरणस्य विश्लेषणम् -

दैत्य + अरि:, श्री + ईश:, विष्णु + उदय: इत्यत्र अकार-ईकार-उकारेभ्य: अग्रे तत्तत्सवर्णिन: एव स्वरा: सन्ति, अत: पूर्वपरयो: सवर्णदीर्घ एकादेश: अत्र भवति, दैत्यारि:, श्रीश:, विष्णूदय:, इति। होतृ+लृकार: इत्यत्र ऋकारात्पर: सवर्णी लृकार: विद्यते, लृकारस्तु दीर्घो भवत्येव नहि, अत: सवर्णदीर्घत्वेन ॠकार एव भवति होतॄकार: इति।

रूपलेखनप्रकार :-

दैत्यारि: = दैत्य+अरि: इत्यत्र ''अक: सवर्णे दीर्घ:'' इति सूत्रेण पूर्वपरयो: स्थाने आकाररूपसवर्णदीर्घे एकादेशे कृते 'दैत्यारि:' इति रूपं सिद्धम्।

अन्यानि उदाहरणानि :-

क्रमश: विद्या+आलय: = विद्यालय:, देव+आलय: = देवालय:, कपि+ईश: = कपीश:, रवि+इन्द्र: = रवीन्द्र:, भानु+उदय: = भानूदय:, पितृ+ऋकार: = पितॄकार: इत्यादीनि।

४३. एङः पदान्तादति ६/१/१०९

पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव।

४४. सर्वत्र विभाषा गोः ६/१/११२

लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः पदान्ते। गो अग्रम्, गोऽग्रम् एङन्तस्य किम् ? चित्रग्वग्रम्। पदान्ते किम् ? गोः।

---

४३. एङः पदान्तात् अति इतिच्छेदः। 'अति' इति कृततपरस्य अकारस्य सप्तम्येकवचनम्। तपरत्वात् समकालस्यैव ग्रहणात् अत् इत्यस्य ह्रस्वः अकारः इत्यर्थः। पदान्तात् एङः अर्थात् पदान्ते स्थितात् एङः (एओ) ह्रस्वे अकारे परे पूर्वरूपमेकादेशः भवति, न तु अयादेशः अवादेशश्च।

उदाहरणस्य विश्लेषणम् -

हरे+अव, विष्णो+अव इत्यत्र 'हरे' 'विष्णो' इति सम्बोधनान्तपदद्वयम् एङन्तमस्ति, अस्माच्च पदान्तादेङः अव इति ह्रस्वः अकारः परः विद्यते। अत्र प्राप्तम् 'एचोऽयवायावः' इति सूत्रं प्रबाध्य पूर्वपरयोः पूर्वरूपमेकादेशः अनेन विधीयते, अतः हरेऽव, विष्णोऽव इति स्थितिः।

रूपलेखनप्रकारः -

हरे+अव इत्यत्र 'एचोऽयवायावः'' इति सूत्रेण अचि परे एकारस्य अयादेशे प्राप्ते तं प्रबाध्य ''एङः पदान्तादति'' इति सूत्रेण पूर्वपरयोः 'ए-अ' इत्यनयोः स्थाने पूर्वरूपैकादेशे कृते हरेऽव इति रूपं सिद्धम्।

अन्यानि उदाहरणानि -

रामो+अस्मि = रामोऽस्मि। शिवो + अर्च्यः = शिवोऽर्च्यः। ग्रामे + अस्मिन् = ग्रामेऽस्मिन्। कृते + अपि = कृतेऽपि इत्यादीनि।

४४. पदान्ते विद्यमानस्य एङन्तस्य गोशब्दस्य ह्रस्वे अकारे परे (अति परे) विकल्पेन प्रकृतिभावः भवति अर्थात् न किमपि सन्धिकार्यं विकाररूपं भवति। यथा प्रकृतिः तथैव तिष्ठति इत्यर्थः। अर्थात् 'एङः पदान्तादति' इत्यस्य अपवादरूपम् इदम्। सर्वत्र अर्थात् लौकिके संस्कृते वैदिके च।

उदाहरणविश्लेषणम् :-

गो + अग्रम् इत्यत्र अवादेशं प्रबाध्य ''एङःपदान्तादति'' इति सूत्रेण पूर्वरूपस्य प्राप्तिः, गोशब्दस्य एङन्तत्वात्। अनेन सूत्रेण एङन्तस्य गोशब्दस्य विषये अति परे विकल्पेन विशेषकार्यं प्रकृतिभावात्मकं क्रियते। अतः गो अग्रम् इति रूपम्। यत्र पक्षे प्रकृतिभावः न विहितः तत्र पूर्वरूपमेकादेशः अतः 'गोऽग्रम्' इति द्वितीयं रूपम्।

अत्र प्रश्नः -

एङन्तस्य किम्? अर्थात् गोशब्दस्य स्वभावतः एङन्तत्वात् सिद्धे कार्ये किमर्थम् 'एङन्तस्य' इति गोशब्दविशेषणम् ? उत्तरम् - न हि सर्वत्र गोशब्दः एङन्तः। यथा चित्रा गावः अस्य चित्रगुः इति बहुव्रीहिसमासे

उकारान्तत्वं प्राप्नोति गोशब्दः। 'एङन्तस्य' इति विशेषणाभावे तु चित्रगु+अग्रम् इत्यत्रापि प्रकृतिभावस्य प्राप्तिः संभवा, गोशब्दत्वात्। सा च न भवेत् एतदर्थम् 'एङन्तस्य' इति विशेषणं कृतम्। सति विशेषणे तु चित्रगुः इत्यस्य एङन्तत्वाभावात् प्रकृतिभावस्य प्राप्तिरेव न भवति। अतः यणि जाते चित्रग्वग्रम् इति रूपं निष्पन्नं भवति।

अपरः प्रश्नः -

पदान्ते इति किम् ? अर्थात् पदान्ते एङन्तस्य गोशब्दस्य इति किमर्थमुच्यते ? उत्तरम् - 'पदान्ते' इति यदि न कथ्येत तर्हि अपदान्तेऽपि एङन्तस्य गोशब्दस्य अति परे प्रकृतिभावापत्तिः स्यात्। यथा-गोशब्दस्य पञ्चम्येकवचने ङसि विभक्तौ गो+अस् इत्यत्रापि अपदान्ते विद्यमानस्य एङन्तस्य गोशब्दस्य ह्रस्वेऽकारे परे पूर्वरूपमेव प्रबाध्य प्रकृतिभावः भवेत्। 'पदान्ते' इति कथिते तु अस्य अपदान्तत्वात् नास्य सूत्रस्यात्र प्रवृत्तिः, अतः पूर्वरूपे गोः इति निष्पन्नम्।

४५. **अनेकाल्शित्सर्वस्य १/१/५५**
इति प्राप्ते।

४६. **ङिच्च १/१/५६**
ङिदनेकालप्यन्त्यस्यैव स्यात्।

४७. **अवङ् स्फोटायनस्य ६/१/१२३**
पदान्ते एङन्तस्य गोरवङ् वाऽचि। गवाग्रम्, गोऽग्रम्। पदान्ते किम्? गवि।

रूपलेखनप्रकार :-

गोअग्रम्, गोऽग्रम् - गो+अग्रम् इत्यत्र 'एचोऽयवायाव:' इत्यनेन अवादेश प्राप्ते, तं प्रबाध्य ''एङ: पदान्तादति'' इति सूत्रेण पूर्वरूपे प्राप्ते, तदपि प्रबाध्य ''सर्वत्र विभाषा गो:'' इति सूत्रेण विकल्पेन प्रकृतिभावे कृते गो अग्रम् इति रूपम्। प्रकृतिभावाभावपक्षे तु पूर्वरूपैकादेशे 'गोऽग्रम्' इति रूपं निष्पन्नम्।

४५. **अनेकाल्.** इति। अग्रे ''अवङ् स्फोटायनस्य'' इति सूत्रेण पदान्ते एङन्तस्य गोशब्दस्य अचि परे अवङोदेश: विधास्यते। स च अवङादेश: किं सम्पूर्णस्य गोशब्दस्य स्यात् 'अन्त्यस्य वा ? इति प्रश्नं समाधातुं समाधानपरकं किमप्याह - अनेकाल् - इति. अनेक: अल् यस्य स अनेकाल्, शकरावयव: इत् यस्य स शित्। अनेकाल् आदेश:, शिच्च आदेश: यस्य कथित: तस्य सर्वस्य = सम्पूर्णस्य स्थाने भवति। एतद् 'अलोऽन्त्यस्य' इत्यस्य अपवादभूतम् इति फलितम्।

४६. **ङिच्च** - ङकारावयव: इत् यस्य स ङित्। अनेकाल् सन् अपि य आदेश: ङित् (यत्र ङ्वर्णस्य इत्संज्ञा) स आदेश: अन्त्यस्य अल: एव स्थाने स्यात्, न तु अनेकाल्त्वात् सम्पूर्णस्य इति भाव:। एतच्च 'अनेकाल्शित्सर्वस्य' इत्यस्यापवाद:।

४७. स्फोटायन: कश्चित् पाणिने: प्राग्वर्ती वैयाकरणविशेष:। तन्मतानुसारं पदान्ते एङन्तस्य गो: अचि परे विकल्पेन अवङादेश: भवति। 'अवङ्' इत्यत्र 'अव' इति अकारान्तम् अवशिष्यते, ङकारश्च इत्संज्ञक:। अत: अयमादेश: ङिद् अस्ति। अनेकाल् अप्ययं वर्तते। 'अलोऽन्त्यस्य' इत्यनुसारम् अस्य षष्ठीनिर्दिष्टत्वात् (गो: इत्येवम्) गोशब्दावयवस्य अन्त्यस्य अल: ओकारस्य स्थाने स्यात्, किन्तु तदपवादसूत्रम् ''अनेकाल्शित्सर्वस्य'' इति व्यवस्थापयति यदसौ आदेश: अनेकाल् अस्ति, अनेकाल्त्वात् सर्वस्य = सम्पूर्णस्य गोशब्दस्य स्थाने स्यात्। तस्यापि अपवादसूत्रं 'ङिच्च' इति। एतदनुसारम् अनेकाल् सन्नपि -'अवङ्' आदेश: ङित्त्वात् अन्त्यस्य अल: ओकारस्य एव स्यादिति व्यवस्था। अत: गो+अग्रम् इत्यत्र पदान्ते विद्यमानस्य गोशब्दस्य ओकारस्य स्थाने स्फोटायनमते अवङादेशे ग्+अव+अग्रम् इति जाते ''अक: सवण

दीर्घ:'' इति सवर्णदीर्घे वर्णसम्मेलने कृते 'गवाग्रम्' इति रूपम्। अवङ: अभावपक्षे ''सर्वत्र विभाषा गो:'' इति सूत्रेण विकल्पेन प्रकृतिभावे 'गो अग्रम्' इति द्वितीयं रूपम्। प्रकृतिभावाभावे ''एङ: पदान्तादति'' इति सूत्रेण पूर्वरूपैकादेशे 'गोऽग्रम्' इति तृतीयं रूपम्।

अन्यानि उदाहरणानि -

(१) गवार्चनम्, गोऽर्चनम्, गो अर्चनम्।

(२) गवावयव:, गोऽवयव:, गो अवयव:।

(३) गो+अक्ष: = गवाक्ष: इत्यत्र विकल्प: नास्ति।

४८. **इन्द्रे च ६/१/१२४**
गोरवङ् स्यादिन्द्रे। गवेन्द्रः।

४९. **दूराद्धूते च ८/२/८४**
दूरात् सम्बोधने वाक्यस्य टेः प्लुतो वा।

५०. **प्लुतप्रगृह्या अचि नित्यम्। ६/१/१२५**
एतेऽचि प्रकृत्या स्युः। आगच्छ कृष्ण**३** अत्र गौश्चरति।

५१. **ईदूदेद्द्विवचनं प्रगृह्यम् १/१/११**
ईदूदेदन्तं द्विवचनं प्रगह्यं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू।

---

४८. इन्द्रे शब्दे परे पदान्ते गोशब्दस्य अवङ्आदेशः भवति। 'अवङ् स्फोटायनस्य'' इति विकल्पस्य निवृत्त्यर्थं पुनः 'इन्द्रे च' इति सूत्रस्य आरम्भः।

उदाहरणस्य विश्लेषणम् –

गो+इन्द्रः इत्यत्र 'एचोऽयवायावः' इत्यस्य प्राप्तिः आसीत्, तम् अयादेशं प्रबाध्य ''अवङ्स्फोटायनस्य'' इति विकल्पेन 'अवङ्' आदेशे प्राप्ते तमपि प्रबाध्य ''इन्द्रे च'' इति सूत्रेण नित्य अवङ्आदेशे ग्+अव+इन्द्रः इत्यवस्थायां ''आद्गुणः'' इति गुणैकादेशे गवेन्द्रः इति सिद्धम्।

४९. **दूराद्धूते च** – दूरात् हूते च इतिच्छेदः। दूरात् हूते = सम्बोधने यद् वाक्यं तस्य टेः विकल्पेन प्लुतत्वं भवति। तस्य किं फलम् ? इति चेत् – ''प्लुतप्रगृह्या.'' इति वक्ष्यते।

५०. **'प्लुतप्रगृह्या.' इति।** प्लुताः च प्रगृह्याःच प्लुतप्रगृह्याः। ते अचि (स्वरे) परे प्रकृत्या = स्वभावतः यथा सन्ति तथैव तिष्ठन्ति अर्थात् तत्र सन्ध्यादिकार्यं विकारात्मकं न भवति। प्लुतसंज्ञा, प्रगृह्यसंज्ञा च येषां भवति, ते प्लुताः प्रगृह्याश्च।

उदाहरणस्य विश्लेषणम् –

'आगच्छ कृष्ण३ अत्र गौश्चरति' इति वाक्ये 'आगच्छ कृष्ण' इति सम्बोधनवाक्यस्य टेः णकारोत्तरवर्तिन अकारस्य प्लुतसंज्ञा 'दूराद्धूते च' इति सूत्रेण जाता, ततः परः अत्र इति शब्दस्य अच् अकारः स्थितः, 'कृष्ण३ + अत्र' इत्यत्र सवर्णदीर्घस्य प्राप्तिः, किन्तु 'प्लुतप्रगृह्या अचि नित्यम्' इत्यनेन प्रकृतिभावकरणात् न सवर्णदीर्घः।

रूपलेखनप्रकारः –

'आगच्छ कृष्ण३ अत्र गौश्चरति' इत्यत्र सम्बोधने 'आगच्छ कृष्ण' इति वाक्ये ''दूराद्धूते च'' इति सूत्रेण वाक्यस्य टेः (णकारोत्तरस्य अकारस्य) प्लुतसंज्ञायां कृतायां कृष्ण ३ + अत्र इत्यत्र ''अकः सवर्णे दीर्घः'' इति सवर्णदीर्घैकादेशे प्राप्ते तं प्रबाध्य ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्लुतसंज्ञकस्य प्रकृतिभावे कृते 'आगच्छ कृष्ण३ अत्र॰' इति सिद्धम्।

अन्यानि उदाहरणानि –

आगच्छ प्रभो३ अस्मान् पाहि। शृणु राम३ आश्रमं गच्छाम इत्यादीनि।

५१. ईदन्तम् (ईकारान्तम्) ऊदन्तम् (ऊकारान्तम्) एदन्तम् (एकारान्तम्) यद् द्विवचनं भवति, तस्य प्रगृह्यसंज्ञा स्यात्। द्विवचानन्तम् एव अत्र द्विवचनं ज्ञेयम्।

उदाहरणविश्लेषणम् –

हरी+एतौ, विष्णू+इमौ, गङ्गे+अमू इत्यादिषु हरी इति ईकारान्तं द्विवचनान्तं पदम्, विष्णू इति ऊकारान्तं पदम्, गङ्गे इति एकारान्तं द्विवचनान्तं पदम्। एषाम् प्रगृह्यसंज्ञा भवति। तस्याः फलं तु –''प्लुतप्रगृह्या अचि नित्यम्''

५२. **अदसो मात् १/१/१२**

अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। रामकृष्णावमू आसाते। मात् किम् ? अमुकेऽत्र।

५३. **चादयोऽसत्त्वे १/४/५७**

अद्रव्यार्थाश्चादयो निपाताः स्युः।

५४. **प्रादयः १२४/५८,**

एतेऽपि तथा।

इति प्रकृतिभावः। तेन हरी+एतौ विष्णू+इमौ इत्यत्र यण् न भवति, गङ्गे अमू इत्यत्र अयादेशश्च न भवति। ('हरी' इत्यादौ द्विवचनान्तस्य द्विवचनत्वम् 'अन्तादिवच्च' सूत्रेण परादिवद्भावात् बोध्यम्)

रूपलेखनप्रकारः –

हरी+एतौ इत्यत्र ''इको यणचि'' इति सूत्रेण ईकारस्य यण् प्राप्तः, किन्तु ''ईदूदेद्द्विवचनं प्रगृह्यम् ''इति सूत्रेण 'हरी' इति ईकारान्तद्विवचनस्य (द्विवचनान्तस्य) प्रगृह्यसंज्ञायां कृतायां ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्रकृतिभावे कृते (अतः स्वरसन्धिः यण् न) हरी एतौ इति प्रयोगः साधुः। गङ्गे अमू इत्यत्र अयादेशः प्राप्तः प्रगृह्यत्वात् प्रकृतिभावे स न भवति।

अन्यानि उदाहरणानि –

चक्षुषी एते, गुरू आगच्छतः, नेत्रे इमे, प्रतिष्ठेते एतौ इत्यादीनि।

५२. अदस्शब्दसम्बन्धी यः मकारः, तस्मात् परौ ईदूतौ (ईकार – ऊकारौ) प्रगृह्यसंज्ञकौ भवतः। अत्र ईत्, ऊत् इति पूर्वसूत्रात् अनुवर्तेते, एत् इति तु न अनुवर्तते।

उदाहरणविश्लेषणम् –

अमी इति अदसः पुँल्लिङ्गे प्रथमाबहुवचने, अमू इति द्विवचने रूपम्। अत्र मकारात् परः ईकारः, ऊकारश्च प्रगृह्यसंज्ञकः। ततश्च प्रकृतिभावः भवति। अतः अमी+ईशाः इत्यत्र सवर्णदीर्घैकादेशः, अमू+आसाते इत्यत्र यण् च न भवति।

प्रश्नः – मात् इति ग्रहणं किमर्थम् ? उत्तरम् – 'अमुकेऽत्र' इति। यदि 'मात्' इति ग्रहणं न क्रियेत तदा तु पूर्वसूत्रात् एकारस्यापि अनुवृत्तिः भवेत्, ततश्च अमुके+अत्र इत्यत्र ककारात् परस्य अदस्शब्दसम्बन्धिनः एकारस्यापि प्रगृह्यसंज्ञा स्यात्, तेन पूर्वरूपं न भवेत्। कृते तु माद्ग्रहणे ततः परस्य एकारस्य असंभवात् अनुवृत्तिः न भवति।

रूपलेखनप्रकारः –

अमी+ईशाः इत्यत्र ''अकः सवर्णे दीर्घः'' इत्यनेन सवर्णदीर्घैकादेशे प्राप्ते तं प्रबाध्य ''अदसो मात्'' इत्यनेन सूत्रेण अदस्सम्बन्धिमकारात्परस्य ईकारस्य प्रगृह्यसंज्ञायां कृतायां ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्रकृतिभावे कृते अमी ईशाः इति रूपं निष्पन्नम्। एवमेव 'अमू आसाते' इत्यत्र ऊकारस्य प्रगृह्यसंज्ञकत्वात् प्रकृतिभावः। अतः तत्र अचि परेऽपि यण् न भवति।

५३. **चादयः असत्त्वे** इतिच्छेदः। न सत्त्वम् असत्त्वम्। सत्त्वं = द्रव्यम् (यत्र लिङ्गस्य संख्यायाः कारकस्य च प्रतीतिः भवेत् तद् द्रव्यम्) असत्त्वम् = अद्रव्यम् तस्मिन् असत्त्वे। अर्थात् अद्रव्यार्थे विद्यमानाः च, वा इत्यादयः निपातसंज्ञकाः भवन्ति। द्रव्यम् अर्थः येषां न भवति, ते अद्रव्यार्थाः इति भावः।

५४. अद्रव्यार्थाः प्रादय अपि निपातसंज्ञकाः भवन्ति। प्रादयः द्वाविंशतिसंख्याकाः ''उपसर्गाः क्रियायोगे'' इति सूत्रे उल्लिखिताः। अतः तत्र द्रष्टव्याः।

५५. निपात एकाजनाङ् १/१/१४

एकोऽज् निपात आङ्वर्जः प्रगह्यः स्यात्। इ इन्द्रः। उ उमेशः। 'वाक्यस्मरणयोरङित्' । आ एवं नु मन्यसे। आ एवं किल तत् । अन्यत्र ङित्, आ ईषद् उष्णम् ओष्णम्।

५६. ओत् १/१/१५

ओदन्तो निपातः प्रगृह्यः स्यात्। अहो ईशाः।

---

५५. एकश्चासौ अच् इति एकाच् इति कर्मधारयः, न तु एकः अच् अस्मिन् इति बहुव्रीहिः। न आङ् इति अनाङ् = आङ्भिन्नः। आङ्भिन्न एकाज् निपातः प्रगृह्यसंज्ञकः भवति। आङ्वर्जः = आङ्भिन्नः आङं वर्जयित्वा इत्यर्थः। आङ् इति निपातस्य प्रगृह्यसंज्ञा न भवति इति फलितार्थः।

उदाहरणस्य विश्लेषणम् –

'इ' इति विस्मयार्थकः एकाज् निपातः। 'उ' इति वितर्के अर्थे विद्यमान एकाज् निपातः। एतौ आङ्भिन्नौ स्तः। अतः अनयोः प्रगृह्यसंज्ञा भवति। प्रगृह्यत्वात् प्रकृतिभावः भवति, अतः 'इ इन्द्रः' 'उ उमेशः' इत्यत्र सवर्णदीर्घैकादेशः न भवति।

रूपलेखनप्रकारः –

'इ इन्द्रः' इत्यत्र 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे एकादेशे प्राप्ते 'इ' इत्यस्य निपातस्य एकाच्त्वात् आङ्भिन्नत्वात् च ''निपात एकाजनाङ्'' इति सूत्रेण प्रगृह्यसंज्ञायां कृतायां ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्रकृतिभावे इ इन्द्रः इति सिद्धम्। एवमेव 'उ उमेशः' इत्यपि ज्ञेयम्।

विशेषः –

आङ्, आ च इति द्वौ भिन्नौ निपातौ स्तः। उभयत्रापि 'आ' इत्येव शिष्यते। तत्र आङः प्रगृह्यसंज्ञा न भवति, ङकाररहितस्य (अङितः) तु भवति। तत्र प्रयोगेषु कुत्र 'आङ्' इत्यस्य ङकारानुबन्धकस्य आ भवति, कुत्र च शुद्ध स्य 'आ' इति निपातस्य आ इति, सन्देहः भवति, तं सन्देहं निराकर्तुम् उच्यते – 'वाक्यस्मरणयोरङित्' इति भाष्यवचनम्। अर्थात् वाक्ये स्मरणे च ङिद्भिन्नः भवति। अतः तस्य तु प्रगृह्यसंज्ञा भवति, प्रकृतिभावश्चापि भवति। अन्येषु अर्थेषु यथा – ईषदर्थे, क्रियायोगे, मर्यादार्थे अभिविधौ च प्रयुक्तः 'आ' तु ङिदेव। अतः तस्य प्रगृह्यसंज्ञा न भवति ततः प्रकृतिभावः अपि न। यथा आ उष्णम् = ओष्णम् इत्यत्र प्रगृह्यत्वस्य प्रकृतिभावस्य च अभावात् गुणः भवति। अत्र 'आ' इति ईषदर्थे ङिदस्ति। ''आ एवं नु मन्यसे'' ''आ एवं किल तत्'' इत्यत्र क्रमशः वाक्ये स्मरणे च प्रयुक्तः 'आ' इति निपातः अङिदस्ति। अतः प्रगृह्यत्वात् प्रकृतिभावे सति आ + एवम् इत्यत्र वृद्धिः न भवति इति विवेकः।

५६. ओकारान्तः निपातः प्रगृह्यसंज्ञकः भवति। अहो, अथो इत्यादीनाम् निपातानाम् अनेकाच्त्वात् पूर्वेण अप्राप्ता प्रगृह्यसंज्ञा अनेन क्रियते।

उदाहरणस्य विश्लेषणम् –

'अहो' इति ओकारान्तः निपातः। अस्य च प्रगृह्यसंज्ञा भवति, तस्मात् प्रकृतिभावः। अतः अहो ईशाः इत्यत्र अवादेशः न भवति। यदि प्रगृह्यसंज्ञा न अभविष्यत् तदा तु अवादेशः एवाभविष्यत्।

रूपलेखनप्रकारः –

अहो + ईशाः इत्यत्र ''एचोऽयवायावः'' इति सूत्रेण अचि परे ओकारस्य अवादेशः प्राप्तः किन्तु 'अहो' इत्यस्य ओकारान्त – निपातत्वात् ''ओत्'' इति सूत्रेण प्रगृह्यसंज्ञायां कृतायां ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्रकृतिभावे कृते अहो+ईशाः इति रूपं निष्पन्नम्।

अन्यानि उदाहरणानि –

अथो+अपि = अथो अपि इति। अत्र अथो इति मङ्गलार्थकः ओदन्तः निपातः। मिथो+एतौ = मिथो एतौ इति। अत्र मिथो इति सहार्थे ओदन्तः निपातः।

५७. **सम्बुद्धौ शाकल्यस्येतावनार्षे १/१/१६**
सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे। विष्णो इति, विष्ण इति, विष्णविति।

५८. **मय उञो वो वा ८/३/३३**
मयः परस्य उञो वो वा अचि। किम्वुक्तम्, किमु उक्तम्।

अत्रावधेयम् -

अथो अथ इति द्वौ भिन्नौ निपातौ समानार्थकौ स्तः। मिथो मिथस् एतौ अपि तथैव समार्थकौ द्वौ निपातौ स्तः।

५७. सम्बुद्धौ शाकल्यस्य + इतौ + अनार्षे इतिच्छेदः। ऋषिशब्दः वेदार्थकः अपि। ऋषिसम्बन्धी आर्षः अर्थात् वैदिकः। वेदसम्बन्धी इत्यर्थः। न आर्षः अनार्षः अर्थात् अवैदिकः। य वेदसम्बन्धी न भवति स इति भावः। 'इतौ' इतिशब्दस्य सप्तम्येकवचने रूपम्। परसप्तमी इयम्। सम्बुद्धिः सम्बोधने प्रथमैकवचनम्। सम्बुद्धिः निमित्तमस्य, सम्बुद्धिनिमित्तकः। तादृशः य ओकारः स विकल्पेन प्रगृह्यसंज्ञकः भवति, अवैदिके इतिशब्दे परे।

उदाहरणस्य विश्लेषणम् -

'विष्णो इति' इत्यत्र 'विष्णो' इति सम्बोधने एकवचनस्य रूपम्। अत्र सम्बुद्धिनिमित्तकः ओकारः णकारोत्तरवर्ती अस्ति, तस्य ओकारस्य प्रगृह्यसंज्ञा भवति, यतो हि ततः परः इतिशब्दः विद्यते। न चायम् इतिशब्दः वेदसम्बन्धी। इत्थं शाकल्यमते प्रगृह्यत्वात् प्रकृतिभावे 'विष्णो इति' एतत् प्रथमं रूपम्। पाणिनिमते तु अवादेशेः विष्णव्+इति इत्यवस्थायां ''लोपः शाकल्यस्य'' इति वैकल्पिके वलोपे 'विष्ण इति' इति द्वितीयं रूपम्। वस्य लोपाभावे तु विष्णविति इति रूपं तृतीयम्।

रूपलेखनप्रकारः -

विष्णो इति, विष्ण इति, विष्णविति – विष्णो + इति इत्यत्र 'एचोऽयवायावः' इति सूत्रेण अवादेशे प्राप्ते ''सुम्बुद्धौ शाकल्यस्येतावनार्षे'' इति सूत्रेण णकारोत्तरवर्तिन ओकारस्य सम्बुद्धिनिमित्तकत्वात् विकल्पेन प्रगृह्यसंज्ञायां कृतायां, ''प्लुतप्रगृह्या अचि नित्यम्'' इति सूत्रेण प्रकृतिभावे विष्णो इति प्रथमं रूपम्। प्रगृह्यत्वाभावपक्षे अवादेशे विष्णव्+इति इत्यवस्थायां ''लोपः शाकल्यस्य'' इति सूत्रेण विकल्पेन वकारस्य लोपे विष्ण इति इति द्वितीयं रूपम्। (अत्र गुणस्तु न, वलोपस्य त्रैपादिकत्वात् गुणविधायकं प्रति असिद्धत्वात्)। वलोपाभावपक्षे तु विष्णविति इति तृतीयं रूपं सिद्धम्।

अन्यानि उदाहरणानि -

भानो इति, भान इति, भानविति। शम्भो इति, शम्भ इति, शम्भविति। गुरो इति, गुर इति, गुरविति। मनो इति, मन इति, मनविति इत्यादीनि।

५८. मय् इति प्रत्याहारः, तत्र म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प इति वर्णाः। मयः परस्य उञ् (उ) इति एकाचः निपातस्य विकल्पेन व् इत्यादेशः भवति अचि परे सति। 'निपात एकाजनाङ्' इति प्रगृह्यत्वात् प्रकृतिभावे प्राप्ते, यणः अप्राप्तौ इदं वचनम्।

रूपलेखनप्रकारः -

किम् उ उक्तम् इत्यत्र ''इको यणचि'' इत्यनेन उकारस्य यणि प्राप्ते तत्प्रबाध्य ''निपात एकाजनाङ्'' इति सूत्रेण 'उ' इति निपातस्य प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यम्' इति सूत्रेण प्रकृतिभावे च प्राप्ते ''मय उञो वो वा'' इत्यनेन सूत्रेण 'उ' इत्यस्य विकल्पेन 'व्' आदेशे किम्वुक्तम् इति रूपम्। वादेशाभावे प्रकृतिभावे किमु उक्तम् इति रूपं द्वितीयम्।

५९. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६/१/१२७

पदान्ता इको ह्रस्वा वा स्युरसवर्णेऽचि। ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः। चक्रि अत्र, चक्र्यत्र। पदान्ता इति किम् ? गौर्यौ।

६०. अचो रहाभ्यां द्वे ८/४/४६

अच पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। गौर्य्यौ। (न समासे)। वाप्यश्वः।

---

५९ पदान्ताः इ उ ऋ लृ इति वर्णाः (इकः) असवर्णे अचि परे शाकल्यस्य मते विकल्पने ह्रस्वाः भवन्ति। एते वर्णाः सवर्णान् ग्राहयन्ति, अविधीयमानत्वात्।

उदाहरणस्य विश्लेषणम् –

'चक्री+अत्र' इत्यत्र 'चक्री' इति पदम्। अत्र पदान्तः वर्णः 'ई' विद्यते, स च इगन्तर्गतः। तस्माच्च ईकारात्परः 'अत्र' इत्यस्य घटकः अकारः, स च अकारः ईकारस्य असवर्णः अच् वर्तते। अतः अत्र पदान्तात् इकः परः असवर्णः अच् विद्यते इति कृत्वा ईकारस्य ह्रस्वत्वं भवति चक्रि+अत्र इति जातम्। कृते ह्रस्वे यण् तु न भवति, ह्रस्वविधिसमर्थ्यात्। कृते यणि तु ह्रस्वत्वकरणमेव व्यर्थं स्यात् इति भावः। पाणिनिमते तु ह्रस्वत्वं न भवति, तत्र पक्षे यणेव स्यात् अतः चक्र्यत्र इति द्वितीयं रूपं भवति।

रूपलेखनप्रकारः –

चक्री+अत्र इत्यत्र ''इको यणचि'' इति सूत्रेण ईकारस्य स्थाने यण्त्वेन यकारे प्राप्ते ''इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'' इति सूत्रेण विकल्पेन पदान्तस्य ईकारस्य ह्रस्वत्वे कृते चक्रि अत्र इति प्रथमं रूपम्। ह्रस्वत्वाभावपक्षे यणि कृते 'चक्र्यत्र' इति द्वितीयं रूपं सिद्धम्। कृते ह्रस्वे ह्रस्वत्वविधि सामर्थ्यात् यण् न भवति, तथा सति ह्रस्वत्वस्य वैयर्थ्यापत्तेः।

प्रश्नः –

अत्र पदान्ताः इकः इति किमर्थमुक्तम् ? इति प्रश्ने – गौर्यौ इति उत्तरम्। अर्थात् यदि पदान्ताः इति विशेषणं नोच्येत तर्हि अपदान्तस्यापि इकः ह्रस्वत्वापत्तिः आपतेत्। तथा सति गौरी + औ इत्यत्र अपदान्तस्य ईकारस्य ह्रस्वत्वे सति तद्विधिसामर्थ्यात् यणेव न स्यात् ततश्च गौर्यौ इति रूपं न सिद्ध्येत् इति भावः।

अन्यानि उदाहणानि –

दण्डी + आह = दण्डि आह, दण्ड्याह। ज्ञानी + आगतः = ज्ञानि आगतः, ज्ञान्यागतः। बली + ऋक्षः = बलि ऋक्षः, बल्यृक्षः। तेजस्वी + आगच्छति = तेजस्वि आगच्छति, तेजस्व्यागच्छति। धनी + ऐच्छत् = धनि + ऐच्छत्, धन्यैच्छत् इत्यादीनि।

६०. अत्र 'यर्' इति 'वा' इति च पदद्वयं ''यरोऽनुनासिकेऽनुनासिको वा'' इति सूत्रात् अनुवर्तते। अचः इति पञ्चम्येकवचनं, 'रहाभ्याम्' इति पञ्चमीद्विवचनान्तम्। अतः अचः परौ यौ रेफहकारौ स्तः, ताभ्यां रेफहकाराभ्यां (रेफात् हकारात् इति प्रत्येकस्मात्) परः यर् (य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द ख फ छ ठ थ च ट त क प श ष स इत्येते वर्णाः अर्थात् हकारं परित्यज्य सर्वे व्यञ्जनवर्णाः) द्वित्वं प्राप्नोति विकल्पेन।

उदाहरणस्य विश्लेषणम् –

गौरी+औ इत्यत्र ''इको यणचि'' इति सूत्रेण ईकारस्य यण्त्वेन यकारे कृते गौर् + य् + औ इत्यवस्थायाम् गकारोत्तरवर्तिन औकारात् परः रेफः, तस्माच्च रेफात् परः यर् यकारः अस्ति, तस्य विकल्पेन द्वित्वं भवति अतः गौर् य् य् औ = 'गौर्य्यौ' इति रूपम्। यत्र द्वित्वं न भवति, तस्मिन् पक्षे एकयकाररूपं गौर्यौ इति रूपम्।

रूपलेखनप्रकारः –

गौर्य्यौ, गौर्यौ – गौरी + औ इत्यत्र ''इको यणचि'' इति सूत्रेण ईकारस्यस्थाने यण्त्वेन यकारे कृते गौर्य् औ इत्यवस्थायाम् ''अचो रहाभ्यां द्वे'' इति सूत्रेण अचः परस्मात् रेफात् परस्य यकारस्य (यरः) विकल्पेन द्वित्वे

६१. **ऋत्यकः ६/१/१२८**

ऋति परे पदान्ता अकः प्राग्वद् वा। ब्रह्म ऋषिः, ब्रह्मर्षिः। पदान्ताः किम्? आर्च्छत्।

इत्यच्सन्धिः

गौर् य् य् औ वर्णसम्मेलने गौर्य्यौ इति प्रथमं रूपम्। द्वित्वाभावे गौर्यौ इति द्वितीयं रूपं निष्पन्नम्।

वार्तिकम् -

(न समासे) ''इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'' इति सूत्रेण पदान्तस्य इकः यत् ह्रस्वत्वं भवति, तत् समासे स्थितस्य इकः न भवति। यथा वाप्यश्वः इति रूपम्। वाप्याम् अश्वः = वाप्यश्वः इति सप्तमीतत्पुरुषः। अत्र समासे ईकारान्तं 'वापी' इति पदं ह्रस्वं न भवति, अतः यणि सति एकमेव रूपम्। समासेऽपि सति ह्रस्वे तु रूपद्वयं स्यात्।

अन्यानि उदाहरणानि -

द्वित्वस्य - शर्म्मा, शर्मा। कर्त्ता, कर्ता इत्यादीनि।(न समासे) इत्यस्य तु - सूच्यग्रम्, भवान्यात्मजः, वध्वागतम् इत्यादीनि।

६१. **ऋति** + **अकः** इतिच्छेदः। पदान्ताः अकः ऋति (ह्रस्वे ऋकारे) परे विकल्पेन ह्रस्वाः भवन्ति। अत्र अकः इति अविधीयमानत्वात् सवर्णान् ग्राहयन्ति इति ज्ञेयम् अन्यथा तु वर्णसमाम्नाये दीर्घाणाम् अभावात् ह्रस्वत्वविधानमेव व्यर्थं स्यात्।

उदाहरणस्य विश्लेषणम् -

ब्रह्मा + ऋषिः इत्यत्र 'ब्रह्मा' इत्यत्र पदान्तः 'आ' इति अक् अस्ति। अस्माच्च परः 'ऋषि' इत्यस्य ऋकारः। तस्मिन् ऋकारे (ह्रस्व-ऋकारे) परे पदान्तस्य अकः = आकारस्य विकल्पेन ह्रस्वत्वं विधीयते। यत्र ह्रस्वविधिः जातः, तत्पक्षे स्वरसन्धिः (गुणः) न भवति।

रूपलेखनप्रकारः -

ब्रह्मा + ऋषिः इत्यत्र ''आद्गुणः'' इति सूत्रेण पूर्वपरयोः गुणैकादेशे प्राप्ते ''ऋत्यकः'' इति सूत्रेण पदान्तस्य = आकारस्य विकल्पेन ह्रस्वत्वे ब्रह्म ऋषिः इति रूपम्। सति च ह्रस्वे तत्र न गुणः, ह्रस्वविधिसामर्थ्यात्। ह्रस्वत्वाभावपक्षे ब्रह्मा+ऋषिः इत्यत्र आन्तरतम्यात् अकाररूपे गुणैकादेशे ''उरण् रपरः'' इति सूत्रेण रपरत्वे च कृते ब्रह्म् + अर् + षिः इत्यवस्थायां वर्णसम्मेलने जलतुम्बिकान्यायेन रेफस्य ऊर्ध्वगमने ''ब्रह्मर्षिः'' इति द्वितीयं रूपम्।

प्रश्न :-

अत्र पदान्ताः अकः इति किमर्थम् उक्तम् ? उत्तरम् - यदि पदान्ताः इति नोच्यते तर्हि अजादेः धातोः विधीयमानस्य आडागमस्य अपि 'आ + ऋच्छत्' इत्यत्र ह्रस्वत्वं स्यादिति भावः। तथा सति 'आर्च्छत्' इति रूपं न स्यात्।

अन्यानि उदाहरणानि -

पूषा+ऋच्छति :- पूष ऋच्छति, पूषर्च्छति इत्यादीनि।

इति अच्सन्धिः समाप्तः।

अभ्यासार्थं प्रश्नाः

वस्तुनिष्ठप्रश्नाः -

१. इकः स्थाने यण् भवति :

(क) अणि परे (ख) अचि परे

(ग) अलि परे (घ) हलि परे ( )

२. षष्ठीनिर्दिष्टः आदेशः ....अलःस्थाने भवति -

(क) आदेः (ख) मध्यस्थस्य

(ग) अन्त्यस्य (घ) सर्वस्य ( )

३. कपये (कपे + ए) इति उदाहरणम् अस्ति -

(क) यण्सन्धेः (ख) सवर्णदीर्घसन्धेः

(ग) अयादिसन्धेः (घ) पूर्वरूपसन्धेः ( )

४. गङ्गौघः इत्यत्र सन्धिरस्ति -

(क) गुणः (ख) वृद्धिः

(ग) पररूपम् (घ) अयादिः ( )

५. उपदेशे .... अचः इत्संज्ञा भवति -

(क) अन्त्यस्य (ख) अनुनासिकस्य

(ग) आदेः (घ) अननुनासिकस्य ( )

६. 'आ ऐ औ' इति वर्णानां संज्ञा भवति -

(क) गुणः (ख) वृद्धिः

(ग) ऊष्मसंज्ञा (घ) टि ( )

७. प्रादयः उपसर्गसंज्ञकाः भवन्ति -

(क) धातुयोगे (ख) क्रियायोगे

(ग) प्रत्यययोगे (घ) पदयोगे ( )

८. असत्त्वे चादयः भवन्ति -

(क) निपातसंज्ञकाः (ख) गतिसंज्ञकाः

(ग) उपसर्गसंज्ञकाः (घ) कर्मप्रवचनीयसंज्ञकाः ( )

लघूत्तरात्मकाः प्रश्नाः -

९. 'इको यणचि' इति सूत्रार्थं विलिख्य उदाहरणानि लेख्यानि।

१०. 'तपरस्तत्कालस्य' इति सूत्रार्थं स्पष्टयत।

११. वृद्धिसंज्ञाविधायकं सूत्रं विलिख्य 'वृद्धिरेचि' इति सूत्रं सोदाहरणं वर्णयत।

१२. पररूपसन्धिः कुत्र भवति ? इति विलिख्य 'प्रेजते' इति रूपं साधयत।

१३. कियन्तः उपसर्गाः ? तेषां नामानि लिखत।

१४. सवर्णदीर्घैकादेशः कस्याम् अवस्थायां सम्भवति।

१५. मध्वरिः, कृष्णर्द्धिः, प्रष्ठौहः, विष्णोऽव, इ इन्द्रः, चक्रि अत्र, ब्रह्मर्षिः एषु चत्वारः प्रयोगाः साध्याः।

अथ हल्सन्धिः

६२. स्तोः श्चुना श्चुः ८/४/४०
सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। रामश्शेते। रामश्चिनोति। सच्चित्। शार्ङ्गिञ्जयः।

६३. शात् ८/४/४४
शात् परस्य तवर्गस्य चुत्वं न स्यात्। विश्नः। प्रश्नः।

६४. ष्टुना ष्टुः ८/४/४१
स्तोः ष्टुना ष्टुः स्यात्। रामष्षष्ठः। रामष्टीकते। पेष्टा। तट्टीका। चक्रिण्ढौकसे।

---

६२. स् च तुश्च स्तुः, तस्य स्तोः। श् च चुश्च श्चुः, तेन श्चुना। श्चुः। अर्थात् सकारतवर्गयोः शकारेण चवर्गेण च योगे सति सस्य स्थाने शकारः, तवर्गस्य च यथासङ्ख्यं चवर्गः भवति।

उदाहरणस्य विश्लेषणम् –

रामस् + शेते इत्यत्र सस्य शकारेण योगः अस्ति, अतः सस्य स्थाने 'श' आदेशः जातः। अतः रामश्शेते इति रूपम्। एवमेव रामस् + चिनोति अत्र सस्य चवर्गयोगः। सत् + चित् इत्यत्र तवर्गस्य चवर्गयोगः। शार्ङ्गिन् + जय इत्यत्रापि चवर्गयोगः। अतः सस्य शकारः, तवर्गस्य च चवर्गादेशः भवति।

रूपलेखनप्रकारः –

रामस् + शेते इत्यत्र ''स्तोः श्चुना श्चुः'' इति सूत्रेण शकारयोगे सस्य शकारादेशे कृते रामश्शेते इति सिद्धम्।

अन्यानि उदाहरणानि –

हरिस् शेते = हरिश्शेते। कस् + चित् = कश्चित्। सत् + चरित्रम् = सच्चरित्रम्। विपत् + जालम् = विपज्जालम् इत्यादीनि।

६३. चुत्वस्य प्रतिषेधकं सूत्रम् एतत्। शकारात् परस्य तवर्गस्य शकारयोगे सत्यपि चुत्वं न भवति इत्याशयः।

उदाहरणस्य विश्लेषणम् –

विश् + नः, प्रश् + नः इत्यत्र नकारः तवर्गस्य वर्णः। स च शकारात् परः विद्यते। अत्र तवर्गस्य शकारेण योगः अस्ति, अतः 'स्तोः श्चुना श्चुः' इति सूत्रेण चुत्वं प्राप्तं भवति। 'शात्' इति सूत्रेण चुत्वस्य निषेधः क्रियते, अतः विश्नः, प्रश्नः इत्येव रूपे भवतः।

रूपलेखनप्रकारः –

विश् + नः, इत्यत्र ''स्तोः श्चुना श्चुः'' इति सूत्रेण शकारयोगे नस्य चुत्वेन ञकारे प्राप्ते ''शात्'' इति सूत्रेण निषेधे कृते विश्नः इति रूपं सिद्धम्।

६४. ष् च टुश्च ष्टुः। सकारतवर्गयोः षकारेण टवर्गेण च योगे सति सस्य षः, तवर्गस्य च स्थाने टवर्गः प्रयुज्यते इति भावः।

उदाहरणस्य विश्लेषणम् –

रामस् + षष्ठः इत्यत्र सस्य षकारेण योगः (सम्बन्धः) अस्ति, अतः सस्य 'ष' आदेशः भवति। एवमेव रामस् + टीकते इत्यत्र सस्य टकारेण योगः, पेष् + ता इत्यत्र तवर्गस्य षकारेण योगः, तत् + टीका इत्यत्र तवर्गस्य टवर्गीयेण योगः, चक्रिन् + ढौकसे इत्यत्रापि तथैव। अतः सर्वत्र तवर्गस्य टवर्गरूपे सस्य च षकाररूपे परिवर्तनं जातम्।

रूपलेखनप्रकारः –

रामस् + षष्ठः इत्यत्र ''ष्टुना ष्टुः इति सूत्रेण षकारयोगे सस्य षकारादेशे कृते ''रामष्षष्ठः'' इति रूपं सिद्धम्।

६५. न पदान्ताट्टोरनाम् ८/४/४२

पदान्ताट्टवर्गात् परस्याऽनामः स्तोः ष्टुर्न स्यात्। षट् सन्तः। षट् ते पदान्तात् किम् ? ईट्टे। टोः किम् ? सर्पिष्टमम्। (अनाम्नवतिनगरीणामिति वाच्यम्) षण्णाम्। षण्णवतिः। षण्णगर्यः।

६६. तोःषि ८/४/४३

न ष्टुत्वम्। सन्षष्ठः।

अन्यानि उदाहरणानि –

त्रयस् + षट्पदाः = त्रयष्षट्पदाः। मत् + टीका = मट्टीका। पदार्थास् + टङ्किताः = पदार्थाष्टङ्किताः।

६५. न पदान्तात् टोः अनाम् इतिच्छेदः। पदान्तात् टवर्गात् परस्य सस्य तवर्गस्य च ष्टुत्वं न भवति, किन्तु 'नाम्' इत्यस्य तु नस्य टवर्गणकारः भवति। **वार्तिकम्** – नाम्भिन्नस्य, नवतिभिन्नस्य, नगरीभिन्नस्य च ष्टुत्वं न भवति इति वक्तव्यम् अर्थात् पदान्तात् टवर्गात् परस्य नाम्, नवति, नगरी इति पदत्रयस्य तवर्गनकारस्य तु ष्टुत्वं भवति, अन्यस्य ष्टुत्व निषेधः इति वार्तिकाशयः।

उदाहरणस्य विश्लेषणम् –

षट् + सन्तः इत्यत्र पदान्तात् टवर्गात् परस्य सस्य 'ष्टुना ष्टुः' इति प्राप्तस्य षादेशस्य अनेन निषेधः क्रियते। षट् + ते इत्यत्र तवर्गस्य प्राप्तः टवर्गादेशः अनेन निषिध्यते, पदान्तटवर्गात् परत्वात्। षड्नाम्, षड्नवतिः, षड्नगर्यः इत्यत्र तु वार्तिकानुसारं नस्य टवर्गणकारः विधीयते डस्य अनुनासिके च षण्णाम्, षण्णवतिः, षण्णगर्यः इति रूपाणि भवन्ति।

रूपलेखनप्रकारः –

षट् सन्तः षड् + सन्तः इत्यत्र ''ष्टुना ष्टुः'' इति सूत्रेण सस्य षत्वे प्राप्ते'' न पदान्ताट्टोरनाम्'' इति सूत्रेण निषेध े कृते ''खरि च'' इति सूत्रेण डस्य चर्त्वेन टकारे कृते 'षट्सन्तः'' इति रूपं सिद्धम्। एवमेव षट्ते इत्यत्र टुत्वनिषेधः।

षण्णाम् –

षड् + नाम् इत्यत्र ''न पदान्तात्.'' इति ष्टुत्वस्य निषेधे प्राप्ते ''अनाम्नवति'' इत्यादिवार्तिकेन प्रतिषेध े ष्टुत्वे च कृते षड्+णाम् इत्यवस्थायां ''प्रत्यये भाषायां नित्यम्'' इति वार्तिकेन डकारस्य अनुनासिके च कृते 'षण्णाम्' इति रूपम्। ईट्टे इत्यत्र ईड् + ते इत्यवस्थायां टवर्गस्य (डकारस्य) पदान्तत्वाभावात् न ष्टुत्वस्य निषेध :, अतः ष्टुत्वे ईड् + टे इति जाते डस्य चर्त्वेन (खरि च) टकारे ईट्टे इति रूपम्। सर्पिष् + तमम् इत्यत्र तु ष्टुत्वं भवति। सूत्रे यदि पदान्तात् ष्टोः इति अकथयिष्यत् तदा तु ष्टुत्वस्य निषेधः अभविष्यत्।

अन्यानि उदाहरणनि –

षट् + तरवः = षट् तरवः। द्विड् + धावति = द्विड्धावति इत्यादीनि।

६६. तु इत्यस्य पञ्चम्येकवचनं तोः इति। षि इति ष् इत्यस्य सप्तम्ये – कवचनम्। अतः तवर्गात् षकारे परे तवर्गस्य टवर्गः न भवति इति सूत्रार्थः।

उदाहरणस्य विश्लेषणम् –

सन् + षष्ठः इत्यत्र तवर्गस्य नकारः, तस्मात् परः 'षष्ठः' इति षकारः। अत्र षकारयोगे तवर्गस्य ''ष्टुना ष्टुः'' इति टवर्गे प्राप्ते, अनेन निषिध्यते। अतः सन्षष्ठः इत्येवं रूपम्।

रूपलेखनप्रकारः –

सन् + षष्ठः इत्यत्र ''ष्टुना ष्टुः'' इति सूत्रेण षकारयोगे तवर्गनकारस्य टवर्गे (टुत्वे) प्राप्ते ''तोः षि'' इति सूत्रेण तन्निषेधे कृते 'सन्षष्ठः' इति सिद्धम्।

६७. झलां जशोऽन्ते ८/२/३९

पदान्ते झलां जशः स्युः। वागीशः।

६८. यरोऽनुनासिकेऽनुनासिको वा ८/४/४५

यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्। एतन्मुरारिः एतद्मुरारिः।

अन्यानि उदाहरणानि -

मयूरात् षण्मुखोऽवतरति। पुष्पात् षट्पद उत्पतति इत्यादीनि।

६७. **झलाम् जशः अन्ते** इतिच्छेदः। पदान्ते विद्यमानानां झलां स्थाने जशः = वर्गाणां तृतीयवर्णाः जबगडदाः यथायोग्यं स्युः।

उदाहरणस्य विश्लेषणम् -

वाक् + ईशः इत्यत्र पदान्ते विद्यमानः झल् ककारः, तस्य च स्थाने कवर्गतृतीयः गकारः भवति, अतः वागीशः इति रूपम्। एवमेव जगदीशः इत्याद्यपि ज्ञेयम्।

रूपलेखनप्रकार :-

वाक्+ईशः इत्यत्र ''झलां जशोऽन्ते'' इति सूत्रेण पदान्ते विद्यमानस्य ककारस्य जश्त्वेन गकारे कृते वाग् + ईशः इत्यवस्थायां वर्णसम्मेलने कृते वागीशः इति रूपं सिद्धम्।

अन्यानि उदाहरणानि -

जगत्+ईशः जगदीशः। दिक्+अम्बरः = दिगम्बरः। षट् + आम्रफलानि = षडाम्रफलानि। चित् + आनन्दः = चिदानन्दः। चित् + रूपम् = चिद्रूपम् इत्यादीनि।

६८. **यरः अनुनासिके अनुनासिकः वा** इतिच्छेदः। पदान्ते विद्यमानः यः यर्

प्रत्याहारवर्णः, तस्मात् वर्णात् परे अनुनासिके वर्णे सति तस्य यर्प्रत्याहारवर्णस्य विकल्पेन अनुनासिकवर्णः भवति इत्याशयः।

उदाहरणस्य विश्लेषणम् -

यथा एतद् + मुरारिः इत्यत्र पदान्ते विद्यमानः यर्प्रत्याहारवर्णः दकारः अस्ति। तस्मात् परः मकारः अनुनासिकवर्णः विद्यते। अतः दकारस्य (यरः) स्थाने विकल्पेन तद्वर्गीय एव अनुनासिकः नकारः जातः। अनुनासिकाभावे दकार एव तिष्ठति। इत्थम् एतन्मुरारिः एतद्मुरारिः इति रूपद्वयम्।

रूपलेखनप्रकारः -

एतद् + मुरारिः इत्यत्र ''यरोऽनुनासिकेऽनुनासिको वा'' इति सूत्रेण दकारस्य विकल्पेन अनुनासिके नकारे कृते एतन्मुरारिः इति रूपं सिद्धम्। अनुनासिकाभावे एतद्मुरारिः इत्यपि द्वितीयं रूपम्। (प्रत्यये भाषायां नित्यम्) तन्मात्रम्। चिन्मयम्।

अन्यानि उदाहरणानि -

त्वग् + मनसी = त्वङ्मनसी, त्वग्मनसी। धिग् + मूर्खम् = धिङ्मूर्खम्, धिग्मूर्खम्। मद् + नीतिः = मन्नीतिः मद्नीतिः। जगद् + नाथः = जगन्नाथः, जगद्नाथः इत्यादीनि।

वार्तिकम् -

अनुनासिकादिप्रत्यये परे पदान्तस्य यरः स्थाने नित्यम् अनुनासिकवर्णः भवति।

उदाहरणस्य विश्लेषणम् -

तद् + मात्रम् इत्यत्र पदान्तस्य दकारस्य (यरः) मात्रच् प्रत्यये परे सूत्रेण विकल्पेन अनुनासिके प्राप्ते अनेन वार्तिकेन नित्यम् अनुनासिकत्वं विधीयते, अतः तन्मात्रम् इति एकमेव रूपम्। एवमेव चिन्मयम् इत्यत्रापि ज्ञेयम्।

६९. **तोर्लि: ८/४/६०**

तवर्गस्य लकारे परे परसवर्ण:। तल्लय:। विद्वाँल्लिखति। नस्यानुनासिको ल:।

७०. **उद: स्थास्तम्भो: पूर्वस्य ८/४/६१**

उद: परयो: स्थास्तम्भो: पूर्वसवर्ण:।।

७१. **तस्मादित्युत्तरस्य १/१/६७**

पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम्।

रूपलेखनप्रकार: -

तत् + मात्रम् इत्यत्र ''यरोऽनुनासिकेऽनुनासिको वा'' इति सूत्रेण तस्य विकल्पेन अनुनासिके प्राप्ते ''प्रत्यये भाषायां नित्यम्'' इति वार्तिकेन नित्यम् अनुनासिके कृते तन्मात्रम् इति सिद्धम्।

अन्यानि उदाहरणानि -

वाग् + मय: = वाङ्मय:। वाग् + मात्रम् = वाङ्मात्रम्।षड् + णाम् = षण्णाम् इत्यादीनि।

६९. तो: लि इतिच्छेद:। तवर्गात् लकारे परे तवर्गवर्णस्य परसवर्ण: स्यात्। यथा - तद् + लय: इत्यत्र तवर्गस्य वर्ण: दकार: विद्यते, तस्मात् पर: लय: इति लकार: विद्यमान:। अत: पूर्वस्य दस्य परसवर्ण: लकार: एव भवति। एवमेव विद्वान् + लिखति इत्यत्र तवर्गस्य नकार:, तस्मात्पर: लिखति इति लवर्ण: विद्यते। अत: अनेन सूत्रेण नकारस्य स्थाने परसवर्णत्वेन अनुनासिकलकार: विधीयते। यतो हि पूर्वम् उक्तं यत् यवला: अनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा भवन्ति। अत: अनुनासिकस्य नकारस्य स्थाने क्रियमाण: परसवर्ण:

लकार: अपि अनुनासिक: एव भवति 'विद्वाँल्लिखति' इति। 'तल्लय:' इत्यत्र तु दकार:, स च न अनुनासिक:। अत: तस्य स्थाने परसवर्ण: लकार अपि अननुनासिक एव भवतीति विज्ञेयम्।

रूपलेखनप्रकार: -

तद् + लय: इत्यत्र ''तोर्लि'' इति सूत्रेण दस्य परसवर्णत्वेन लकारे कृते 'तल्लय:' इति सिद्धम्।

अन्यानि उदाहरणानि -

तद् + लीन: = तल्लीन:। जगद् + लीयते = जगल्लीयते। भगवद् + लीला = भगवल्लीला। हसन् + लिखति = हसँल्लिखति। धीमान् + लिखति = धीमाँल्लिखति इत्यादीनि।

७०. उद् इति उपसर्ग:, तस्मात् परस्य स्थाधातो:, स्तम्भधातो: च पूर्वसवर्ण: स्यात्। यथा उद् + स्थानम्, उद् + स्तम्भनम् इत्यत्र उदुपसर्गात् परौ स्थास्तम्भौ धातू स्त:। अत: अनयो: धात्वो: पूर्वसवर्ण: भवति।

प्रश्न: -

उद् इति उपसर्गात् परस्य इत्युक्ते: किं व्यवहितपरस्य अपि कार्यं कर्तुं शक्यते वा ? अव्यवहितपरस्य वा ? इति प्रश्ने वक्ष्यते 'तस्मादित्युत्तरस्य' इति परिभाषां सूत्ररूपाम्।

७१. तस्मात् इति उत्तरस्य इतिच्छेद:। परिभाषासूत्रम् इदम्। पञ्चमीनिर्देशद्वारा यत् कार्यं विधीयते, तत्कार्यं पञ्चमीनिर्देशेन प्रयोगे बोधितात् अव्यवहितपरस्य = व्यवधानशून्यस्य परस्य बोध्यम् इति व्यवस्था। प्रकृतप्रसंगे ''उद: स्थास्तम्भो:'' इति सूत्रे 'उद:' इत्येवं पञ्चमीनिर्देश:। एतेन प्रयोगे उद् + स्थानम्, उद् + स्तम्भनम् इत्यत्र उद् इत्यस्य ग्रहणं भवति। अत: अस्मात् उद: अव्यवहितपरस्य = साक्षात् उत्तरस्य एतेन क्रियमाणं परसवर्णरूपं कार्यं कर्तव्यम्। उद: अव्यवहितपरम् उक्तधातुद्वयम् अस्ति, अत: तस्यैव तत्।

प्रश्न :

उद: अव्यवहितपरस्य स्थाधातो:, स्तम्भधातोश्च किं सम्पूर्णस्य स्थाने पूर्वसवर्ण: कार्य: ? कस्यचिद् अंशविशेषस्य वा ? इति जिज्ञासायाम् अवतारयति व्यवस्थापकं परिभाषासूत्रम् - ''आदे: परस्य'' इति -

७२. आदेः परस्य १/१/५४

परस्य यद्विहितं तत्तस्यादेर्बोध्यम्। इति सस्य थः।

७३. झरो झरि सवर्णे ८/४/६५

हलः परस्य झरो वा लोपः स्यात् सवर्णे झरि।

७४. खरि च ८/४/५५

---

७२. परस्य = उत्तरस्य यत् कार्यं विहितं, तत्कार्यं तस्य आदेः वर्णस्य बोध्यम् इति व्यवस्था। अतः उद् + स्थानम् इत्यत्र उदः अव्यवहितपरस्य स्थाधातोः आदिवर्णस्य सकारस्य, उद् + स्तम्भनम् इत्यत्र स्तम्भधातोः आदिवर्णस्य सकारस्य स्थाने पूर्वसवर्णः वर्णः कर्तव्यः। पूर्वः दकारः तस्य सवर्णिनः तवर्गस्य सर्वे वर्णाः 'तथदधनाः' सन्ति। एतेषु सकारस्य स्थाने कतमः विधेयः ? इति प्रश्ने – 'स्थानेऽन्तरतमः' इति निर्देशानुसारं सस्य सदृशतमः विवारश्वासाघोषमहाप्राणः थकारः एव पूर्वसवर्णः भवति, नान्यः।

उदाहरणस्य विश्लेषणम् –

उद् + स्थानम् इत्यत्र "तस्मादित्युत्तरस्य" "आदेः परस्य" इति सूत्रद्वयसहकारेण "उदः स्थास्तम्भोः पूर्वस्य" इति सूत्रेण उदः अव्यवहितस्य परस्य स्थाधातोः आदेः वर्णस्य सकारस्य स्थाने सदृशतमे पूर्वसवर्णत्वेन थकारे कृते उद् + थ् थानम् इति स्थिते, उद् + स्तम्भनम् इत्यत्र च उद् + थ् तम्भनम् इति स्थिते .... ।

७३. हलः परस्य झर्प्रत्याहारगतवर्णस्य विकल्पेन लोपः भवति सवर्णे झरि परे सति इति सूत्राशयः।

उदाहरणस्य विश्लेषणम् –

उद् + थ् थानम्, उद् + थ् तम्भनम् इत्यत्र दकारात् (हलः) परस्य थकारस्य (झरः) लोपः भवति, यतो हि तस्मात् परः तस्य सवर्णः झर् क्रमशः उक्तयोः प्रयोगयोः थकारः, तकारश्च विद्यते। इत्थम् उद्+थानम् इति, उद्+तम्भनम् इति स्थितिः जाता ....।

७४. खरि = खर्प्रत्याहारान्तर्गताः ये वर्णाः तेषु परेषु, झलां स्थाने चरः = 'च ट त क प श ष स' इत्येते स्युः।

उदाहरणस्य विश्लेषणम् –

उद् + थानम्, उद् + तम्भनम् इत्यत्र उभयत्र दकारः झल्वर्णः, तस्मात् परौ क्रमशः थकारतकारौ स्तः, तौ च खर्प्रत्याहारगतौ विद्येते। अतः खर्परत्वात् झलः =दस्य चर्त्वेन तकारः सञ्जातः इत्येवम् उत् + थानम्, उत् + खरि झलां चरः स्युः। इत्युदो दस्य तः। उत्थानम्। उत्तम्भनम्। तम्भनम् इति स्थितिः जाताः, ततश्च वर्णसम्मेलने उत्थानम् इति, उत्तम्भनम् इति रूपं निष्पद्यते।

रूपलेखनप्रकारः –

उद्+स्थानम् इत्यत्र "तस्मादित्युत्तस्य" "आदेः परस्य" स्थानेऽन्तरतमः" इति सूत्रत्रयसहकारेण "उदः स्थास्तम्भोः पूर्वस्य" इति सूत्रेण सस्य स्थाने पूर्वसवर्णे थकारे कृते उद्+थ् थानम् इति स्थिते" झरो झरि सवर्णे" इति सूत्रेण पूर्वस्य थकारस्य विकल्पेन लोपे कृते उद्+थानम् इत्यवस्थायां "खरि च" इति सूत्रेण उदः दस्य चर्त्वेन तकारे कृते 'उत्थानम्' इति एकं रूपम्। थलोपाभावपक्षे तु 'उत्थ्थानम्' इति द्विथकारयुक्तं रूपं द्वितीयं सिद्धम्। उद्+स्तम्भनम् इत्यत्रापि तथैव थकारे, थलोपे दस्य तकारे उत्तम्भनम् इति
रूपम्। थलोपाभावपक्षे तु उत्थ्तम्भनम् इत्येव रूपम्। थस्य चर्त्वं तु न शङ्क्यम्, चर्त्वं प्रति थकारस्य असिद्ध त्वात्।

अन्यद् उदाहरणम् –

उद् + स्थापकः = उत्थापकः, उद् + स्थितिः = उत्थितिः इत्यपि ज्ञेयम्।

७५. झयो होऽन्यतरस्याम् ८/४/६२

झयः परस्य हस्य वा पूर्वसवर्णः। नादस्य घोषस्य संवारस्य महाप्राणस्यतादृशो वर्गचतुर्थः। वाग्घरिः, वाग्हरिः।

७६. शश्छोऽटि ८/४/६३

झयः परस्य शस्य छो वाऽटि। तद्+शिवः इत्यत्र दस्य श्चुत्वेन जकारे कृते 'खरि च' इति जकारस्य चकारः। तच्छिवः, तच्शिवः। (छत्वममीति वाच्यम्) तच्छ्लोकेन।

---

७५. झयः हः अन्यतरस्याम् इतिच्छेदः। झय् इति प्रत्याहारः, तत्र भ भ घ ढ ध

ज ब ग ड द ख फ छ ठ थ च ट त क प इति वर्णाः। ततः परस्य हकारस्य विकल्पेन पूर्वसवर्णः भवति।

उदाहरणस्य विश्लेषणम् -

वाग् + हरिः इत्यत्र गकारः झय् वर्णः तस्मात् परः हकारः विद्यते, अनेन सूत्रेण हस्य स्थाने पूर्वसवर्णे घकारे कृते वाग्घरिः इतिरूपम्। पूर्वसवर्णाभावे तु वाग्हरिः इत्येवरूपम्। हस्य पूर्वसवर्णत्वेन 'क ख ग ङ' एष्वपि कश्चन कथं न भवति ? केवलः घकार एव कथं जातः ? इति प्रश्ने आह - एषु कवर्गीये घकारः एव हकारेण सदृशतमः बाह्यप्रयत्नसाम्यात्। अतः हकारस्य पूर्वसवर्णः वर्गस्य चतुर्थवर्णः एव भवति, न अन्यः। प्रतिवर्गं चतुर्थः एव नादघोषसंवारमहाप्राणः, हकारः अपि तादृशः एव।

रूपलेखनप्रकारः -

वाक् + हरिः इत्यत्र ''झलां जशोऽन्ते'' इति सूत्रेण ककारस्य जश्त्वे गकारे कृते वाग् + हरिः इत्यवस्थायां ''झयोहोऽन्यतरस्याम्'' इति सूत्रेण हस्य स्थाने विकल्पेन पूर्वसवर्णे घकारे कृते वाग्घरिः इति प्रथमं रूपम्। पूर्वसवर्णाभावे तु 'वाग्हरिः' इत्येव रूपं भवति।

अन्यानि उदाहरणानि -

तद् + हितम् - तद्धितम्। दिग् + हस्ती = दिग्घस्ती। अज् + हलौ = अज्झलौ। स्याद् + हलि = स्याद्ध लि। रत्नमुड् + हरति = रत्नमुड्ढरति इत्यादीनि।

७६. शः छः अटि इतिच्छेदः। अट् इति प्रत्याहारः। झयः परस्य शकारस्य स्थाने वा छकारः भवति, यदि तस्मात् परः अट्वर्णः स्यात्।

उदाहरणस्य विश्लेषणम् -

तद् + शिवः इत्यत्र शकारयोगे दस्य श्चुत्वेन जकारे तज् + शिवः ''खरि च'' इत्यनेन जस्य चर्त्वेन चकारे तच् + शिवः इत्यवस्थायाम् अनेन सूत्रेण शस्य विकल्पेन छत्वं, विधीयते इकाररूपस्य अटः परतः सत्त्वात्। छत्वाभावे शकार एव, अतः उक्तरूपद्वयं भवति।

रूपलेखनप्रकारः -

तद् + शिवः इत्यत्र ''स्तोः श्चुना श्चुः'' इति सूत्रेण दस्य श्चुत्वेन जकारे कृते तज् + शिवः इति जाते ''खरि च'' इत्यनेन सूत्रेण जस्य चर्त्वेन चकारे कृते सति तच् + शिवः इत्यवस्थायां ''शश्छोऽटि'' इति सूत्रेण - विकल्पेन शस्य छत्वे कृते तच्छिवः इति रूपम्। छत्वाभावे तु तच्शिवः इति द्वितीयं रूपं सिद्धम्।

वार्तिकम् -

छत्वकरणे अम्प्रत्याहारे परे इति वक्तव्यम् इति भावः। अर्थात् शकारात् परे अमि सति इति। तद्यथा तद् + श्लोकेन इत्यत्र दस्य जकारे, जस्य चर्त्वेन चकारे तच्श्लोकेन इति जाते शस्य छत्वं भवति, यतो हि तस्मात्परः अम्प्रत्याहारवर्णः लकारः विद्यते। अटि इति कथनमात्रे तु छत्वं न स्यात्, लस्य अट्त्वाभावात्।

अन्यानि उदाहरणानि -

वाक् + शूरः = वाक्छूरः, वाक्शूरः।

७७. **मोऽनुस्वारः ८/३/२३**
मान्तस्य पदस्यानुस्वारो हलि। हरिं वन्दे।

७८. **नश्चापदान्तस्य झलि ८/३/२५**
नस्य मस्य चापदान्तस्य झल्यनुस्वारः । यशांसि । आक्रंस्यते। झलि किम् ? मन्यते।

७९. **अनुस्वारस्य ययि परसवर्णः। ८/४/५८**
स्पष्टम् । शान्तः।

जगत् + शान्तिः = जगच्छान्तिः, जगच्शान्तिः।
यावत् + शक्यम् = यावच्छक्यम्, यावच्शक्यम्।
भवत् + शिष्यः = भवच्छिष्यः, भवच्शिष्यः।
त्वत् + शङ्का = त्वच्छङ्का; त्वच्शङ्का।
मत् + श्लाघा = मच्छ्लाघा, मच्श्लाघा इत्यादीनि।

७७. **मः अनुस्वारः।** मान्तस्य पदस्य अनुस्वारः भवति हलि = व्यञ्जने वर्णे परे। किं सम्पूर्णपदस्य स्थाने अनुस्वारः कार्यः ? न हि, केवलस्य अन्त्यस्य मकारस्य, 'अलोऽन्त्यस्य' इति परिभाषया।

उदाहरणस्य विश्लेषणम् –

हरिम् + वन्दे इत्यत्र पदान्तस्य मकारस्य अनुस्वारः भवति यतो हि तस्मात्परः हल् वर्णः विद्यते, अतः हरिं वन्दे इति।

रूपलेखनप्रकारः –

हरिम् + वन्दे इत्यत्र ''मोऽनुस्वारः'' इति सूत्रेण मस्य अनुस्वारे हरिं वन्दे इति रूपं सिद्धम्।

अन्यानि उदाहरणानि –

विद्यालयम् + गच्छति = विद्यालयं गच्छति। पुस्तकम् + पठति = पुस्तकं पठति । आचार्यम् + नमति = आचार्यं नमति। प्रभुम् + भजति = प्रभुं भजति इत्यादीनि।

७८. **नः च अपदान्तस्य झलि** इति पदच्छेदः। अपदान्तस्य नकारस्य मकारस्य च झलि परे अनुस्वारः भवति।

उदाहरणविश्लेषणम् –

यशान् + सि, आक्रम् + स्यते इत्यत्र क्रमशः अपदान्तः नकारः मकारश्च विद्यते, ततः परः सकारः झल्रूपी। अपदान्तः इत्युक्ते पदमध्यस्थः। अतः नकारस्य मकारस्य अनुस्वारः विधीयते अत्र। इत्थं यशांसि, आक्रंस्यते इति सिद्धिः।

रूपलेखनप्रकारः –

यशान् + सि इत्यवस्थायां ''नश्चापदान्तस्य झलि'' इति सूत्रेण अपदान्तस्य नकारस्य झल्परकत्वात् अनुस्वारे कृते यंशासि इति रूपं सिद्धम्। आक्रंस्यते इत्यत्र मस्य अनुस्वारः इति ज्ञेयम्।

अन्यानि उदाहरणानि –

पयान् + सि = पयांसि। सरान् + सि = सरांसि। सङ्गम् + स्यते = सङ्गंस्यते।, इत्यादीनि।

७९. अनुस्वारस्य स्थाने परसवर्णः भवति ययि = यय्प्रत्याहारे परे। यस्य वर्गस्य परवर्णः, तद्वर्गीयः पञ्चमः वर्णः परसवर्णत्वेन करणीयः।

उदाहरणस्य विश्लेषणम् –

शां + तः इत्यत्र आकारात्परः अनुस्वारः, विद्यते, तस्माच्च परः तवर्गतकारः अस्ति। अनेन सूत्रेण अनुस्वारस्य स्थाने परसवर्णत्वेन तवर्गस्य पञ्चमः नकारः विधीयते, अतः शान्तः इति रूपम्।

७०. **वा पदान्तस्य ८/४/५९**

त्वङ्करोषि, त्वं करोषि।

७१. **मो राजि समः क्वौ ८/३/२५**

क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट्।

रूपलेखनप्रकारः -

शाम् + तः इत्यत्र ''नश्चापदान्तस्य झलि'' इति सूत्रेण अपदान्तस्य मकारस्य स्थाने अनुस्वारे कृते शां + तः इति जाते ''अनुस्वारस्य ययि परसवर्णः'' इति सूत्रेण अनुस्वारस्य परसवर्णत्वेन नकारे कृते 'शान्तः' इति सिद्धम्।

विशेषः अनुस्वारस्य नासिका स्थानम् अस्ति, अतः तस्य स्थाने वर्गस्य पञ्चमः वर्णः करणीयः। कवर्गे परे ङकारः, चवर्गे ञकारः, टवर्गे णकारः, तवर्गे नकार, पवर्गे तु मकारः इति।

अन्यानि उदाहरणानि -

अं + कितः = अङ्कितः। अं + चितः = अञ्चितः। गुं + जनम् = गुञ्जनम्। कुं + ठितः = कुण्ठितः। गुं + फितः = गुम्फितः इत्यादीनि।

७०. पदान्तस्य अनुस्वारस्य विकल्पेन परसवर्णः भवति। अपदान्तस्य तु नित्यम् इति ज्ञेयम्।

उदाहरणस्य विश्लेषणम् -

त्वं + करोषि इत्यत्र 'त्वं' पदम् अस्ति, तस्य अन्ते अनुस्वारः पदान्तः। तस्य अनुस्वारस्य परसवर्णे ङकारे विकल्पेन कृते 'त्वङ्करोषि' इति रूपम्। परसवर्णाभावे तु 'त्वं करोषि' इति।

रूपलेखनप्रकारः -

त्वम् + करोषि इत्यत्र ''मोऽनुस्वार'' इति सूत्रेण मकारस्य अनुस्वारे कृते 'त्वं करोषि' इति स्थिते ''अनुस्वारस्य ययि परसवर्णः'' इति सूत्रेण अनुस्वारस्य नित्यं परसवर्णे प्राप्ते तं प्रबाध्य ''वा पदान्तस्य'' इति सूत्रेण विकल्पेन परसवर्णे ङकारे कृते 'त्वङ्करोषि' इति रूपं सिद्धम्। परसवर्णाभावपक्षे तु 'त्वं' करोषि' इति रूपमपि सिद्धम्।

अन्यानि उदाहरणानि -

त्वं + चलसि = त्वञ्चलसि, त्वं चलसि। शत्रुं + जयति = शत्रुञ्जयति, शत्रुं जयति। अहं + यामि = अहँय्यामि, अहं यामि इत्यादीनि।

७१. **मः राजि समः क्वौ** इतिच्छेदः। क्वौ इति क्वि (क्विप्) इत्यस्य सप्तम्येकवचने रूपम्। प्रत्ययेन तदन्तग्रहणम्, अतः क्वौ परे इत्यस्य क्विबन्ते परे इत्यर्थः। इत्थम् – क्विप्प्रत्ययान्ते राज्शब्दे परे 'सम्' इत्युपसर्गस्य मस्य म एव भवति, न पुनः ''मोऽनुस्वारः'' इति अनुस्वारः इत्याशयः।

उदाहरणस्य विश्लेषणम् -

'सम्राट्' इत्यत्र सम् + राट् इत्यवस्थायां ''मोऽनुस्वारः'' इति प्राप्तम्। अनेन सूत्रेण अवस्थाविशेषे समः मस्य मकार एव विधीयते, अतः 'सम्राट' इति रूपम्। यत्र राज्धातुः परः न भवति, तत्र तु अनुस्वारः भवति। यथा – संरावः इत्यादौ।

रूपलेखनप्रकारः -

सम् + राट् इत्यत्र ''मोऽनुस्वारः'' इति सूत्रेण पदान्तस्य मकारस्य अनुस्वारे प्राप्ते तं प्रबाध्य ''मो राजि समः क्वौ'' इति सूत्रेण मकारस्य मकारे एव कृते वर्णसम्मेलने 'सम्राट्' इति रूपं निष्पन्नम्।

विशेषः उपसर्गः अपि पदं भवति, अतः 'सम्' इत्यत्र मस्य पदान्तत्वम् अस्तीति ज्ञेयम्।

८२. हे मपरे वा ८/३/२६

मपरे हकारे परे मस्य मो वा। किम् ह्मलयति, किं ह्मलयति। (यवलपरे यवला वा) किँय् ह्यः, किं ह्यः। किँव् ह्वलयति, किं ह्वलयति। किँल् ह्लादयति, किं ह्लादयति।

८३. नपरे नः ८/३/२७

नपरे हकारे मस्य नो वा। किन् ह्नुते, किं ह्नुते।

---

८२. मः परः यस्मात् सः मपरः। तादृशे हकारे परे मस्य विकल्पेन म एव भवति। अर्थात् मपरहकारे परे मस्य मः, पक्षे अनुस्वारः।

उदाहरणस्य विश्लेषणम् –

किम् + ह्मलयति इत्यत्र 'किम्' इत्यत्र पदान्तः मकारः, तस्माच्च मकारात्परः मपरहकारः 'ह्म' इति विद्यते। अतः अत्र ''मोऽनुस्वारः'' इति प्राप्तम् अनुस्वारं प्रबाध्य अनेन सूत्रेण मस्य विकल्पेन मकार एव विधीयते। पक्षे तु अनुस्वारः भवति, तत्र किं ह्मलयति इति रूपम्।

रूपलेखनप्रकारः –

किम् + ह्मलयति इत्यत्र ''हे मपरे वा'' इति सूत्रेण विकल्पेन मस्य मकारे कृते किम् ह्मलयति इतिरूपम्। पक्षे तु अनुस्वारे सति किं ह्मलयति इति रूपमपि सिद्धम्।

वार्तिकम् –

यपरहकारे, वपरहकारे, लपरहकारे च परे मस्य विकल्पेन क्रमशः अनुनासिकाः यवलाः विधीयन्ते इति तात्पर्यम्।

उदाहरणविश्लेषणम् –

किम् + ह्यः इत्यत्र यपरहकारः विद्यते। अतः तस्मिन् परे मस्य विकल्पेन अनुनासिकः यकारः। किम् ह्वलयति इत्यत्र मस्य अनुनासिकः वकारः, वपरहकारपरत्वात्। किम् + ह्लादयति, इत्यत्र लपरहकारपरत्वात् मस्य अनुनासिकः लकारः। पक्षे तु सर्वत्र अनुस्वारः।

रूपलेखनप्रकारः –

किम् + ह्यः इत्यत्र ''मोऽनुस्वारः'' इति सूत्रेण मस्य अनुस्वारे प्राप्ते तं प्रबाध्य ''यवलपरे यवला वा'' इति वार्तिकेन मस्य विकल्पेन अनुनासिके यकारे (मस्यापि अनुनासिकत्वात्) कृते किँय् ह्यः इति रूपं सिद्धम्। पक्षे किं ह्यः इति अनुस्वारः। एवमेव अन्यत्रापि ज्ञेयम्।

८३. नपरहकारे परे मस्य विकल्पेन नकारः भवति। नः परः यस्मात् इति नपरः।नपरश्चासौ हकारः नपरहकारः, तस्मिन्।

उदाहरणस्य विश्लेषणम् –

किम् + ह्नुते इत्यत्र नपरहकारपरत्वात् मस्य अनुस्वारं प्रबाध्य अनेन नकारः विधीयते। नकाराभावे तु अनुस्वारः कार्यः।

रूपलेखनप्रकारः –

किम् + ह्नुते इत्यत्र 'मोऽनुस्वारः' इति सूत्रेण मस्य अनुस्वारे प्राप्ते तं प्रबाध्य ''नपरे नः'' इति सूत्रेण मस्य विकल्पेन नकारे कृते 'किन् ह्नुते' इति रूपम्। पक्षे तु अनुस्वारे कृते 'किं ह्नुते' इति रूपं सिद्धम्।

८४. आद्यन्तौ टकितौ १/१/४६

टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः।

८५. ङ्णोः कुक्टुक् शरि ८/३/२८

वा स्तः। (चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्) प्राङ्ख् षष्ठः,

८६. डः सि धुट् ८/३/२९

डात् परस्य सस्य धुड् वा। षट्त्सन्तः, षट्सन्तः।

---

८४. अग्रे आगमाः वक्ष्यन्ते। कस्यापि विशिष्टवर्णस्य पुरः पश्चाद् वा कश्चन वर्णः वर्णसमुदायः वा मित्रवत् आगच्छति स आगमः उच्यते। स च यस्य उक्तः, तस्य कुत्र तिष्ठेत् इति व्यवस्थां सम्पादयन् आह – 'आद्यन्तौ' इति। आदिश्च अन्तश्च आद्यन्तौ। टश्च कश्च इति टकौ। टकौ इतौ = इत्संज्ञकौ ययोः तौ टकितौ, टित् कित् च इत्यर्थः। अर्थात् यस्य आगमस्य टकारः इत्, यस्य च ककारः इत् तौ टकितौ आगमौ यस्य उक्तौ, तस्य (आगमिनः) क्रमशः आद्यवयवः भवति, अन्तावयवश्च भवति। आगमः यस्य भवति स आगमी उच्यते। अर्थात् टिदागमः आगमिनः आदौ अवयवत्वेन तिष्ठति, किदागमश्च अन्तावयवत्वेन इति विवेकः।

८५. ङणोः कुक्टुक् शरि। शर् इति शषसवर्णानां बोधकः प्रत्याहारः। ङ् च ण् च ङ्णौ, तयोः ङ्णोः। अर्थात् शरि परे सति विकल्पेन ङकारस्य कुगागमः, णकारस्य च टुगागमः भवति। कुक् टुक् इत्यत्र क्रमशः क् इति ट् इति अवशिष्यते। एतौ कितौ स्तः।

उदाहरणस्य विश्लेषणम् –

प्राङ् + षष्ठः, सुगण् + षष्ठः इत्यत्र ङकारात् णकारात् च परः षकारः (शर्) अस्ति, अतः ''आद्यन्तौ टकितौ'' इति सूत्रानुसारं ङणोः क्रमशः कित्त्वात् अन्ते कुगागमः टुगागमश्च जातः अतः प्राङ् क् + षष्ठः, सुगण्ट्षष्ठः इति स्थितिः जाता। प्राङ्क्षष्ठः, प्राङ्षष्ठः। सुगण्ठ् षष्ठः, सुगण्ट् षष्ठः, सुगण् षष्ठः।

वार्तिकम् –

शरि परे चयः (वर्गप्रथमवर्णाः) द्वितीयवर्णत्वेन विकल्पेन प्रयुज्यन्ते पौष्करसादेः मतानुसारम्। पौष्करसादिः कश्चन वैयाकरणः प्राचीनः।

उदाहरणस्य विश्लेषणम् –

प्राङ्क् षष्ठः, सुगण् ट् षष्ठः इत्यत्र शर्परत्वात् अनेन वार्तिकेन ककारटकारयोः खकारठकारौ विधीयेते। अतः प्राङ्ख् षष्ठः, सुगण्ठ्षष्ठः इति रूपम्। पक्षे प्रथमवर्णः अपि तिष्ठति प्राङ्क्षष्ठः, सुगण्ट्षष्ठः इत्यपि। यत्र च आगम एव न भवति तस्मिन् पक्षे प्राङ्षष्ठः, सुगण् षष्ठः इति रूपम्।

रूपलेखनप्रकारः –

प्राङ् + षष्ठः इत्यत्र ''ङणोः कुक्टुक् शरि'' इति सूत्रेण ''आद्यन्तौ टकितौ'' इति सूत्रसहकारेण विकल्पेन ङकारस्य अन्तावयवे कुगागमेऽनुबन्धलोपे प्राङ्क्षष्ठः इति जाते, ''चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्'' इति वार्तिकेन ककारस्य विकल्पेन खकारे कृते प्राङ्ख् षष्ठः इति रूपम्।
खकाराभावपक्षे प्राङ्क्षष्ठः = प्राङ्क्षष्ठः इति द्वितीयं रूपम्। आगमाभावे तु प्राङ् षष्ठः इति तृतीयं रूपं सिद्धम्।

८६. डकारात् अव्यवहितपरस्य = व्यवधानशून्यस्य परस्य सकारस्य विकल्पेन धुडागमः भवति। धुडागमस्य 'ध्' अवशिष्यते। अयञ्चः टित् अस्ति। टित्त्वात् सस्य आदौ भवति ''आद्यन्तौ०'' इति व्यवस्थया।

उदाहरणस्य विश्लेषणम् –

षड् + सन्तः इत्यत्र डकारात् साक्षात् परः सकारः अस्ति। अस्य सस्य आदौ धुडागमः अनेन विधीयते। अतः षड् + ध् + सन्तः इत्यवस्था जाता, अत्र चर्त्वेन धस्य तकारे, डस्य च टकारे षट्त्सन्तः। धुडभावे षट्सन्तः इति रूपम्।

८७. **नश्च ८/३/३०**
नान्तात् परस्य सस्य धुड् वा। सन्त्सः, सन्सः।

८८. **शि तुक् ८/३/३१**
पदान्तस्य नस्य शे परे तुग्वा। सञ्छम्भुः, सञ्च्छम्भुः, सञ्च्शम्भुः, सञ्शम्भुः।

८९. **ङमो ह्रस्वादचि ङमुण् नित्यम् ८/३/३२**
ह्रस्वात् परो यो ङम् तदन्तं यत्पदं, तस्मात्परस्याचो ङमुट् स्यात्। प्रत्यङ्ङात्मा, सुगण्णीशः, सन्नच्युतः।

रूपलेखनप्रकारः -

षड् + सन्तः इत्यत्र ''डः सि धुट्'' इति सूत्रेण सस्य आदौ विकल्पेन धुडागमे अनुबन्धलोपे च कृते षड् + ध् + सन्तः इति जाते ''खरि च'' इति सूत्रेण धस्य चर्त्वेन तकारे कृते 'षड्त् सन्तः' इति स्थिते पुनः 'खरि च' इति सूत्रेण डकारस्य चर्त्वेन टकारे कृते 'षट्त्सन्तः' इति प्रथमं रूपम्। यत्र धुट् न कृतः तत्र डकारस्य चर्त्वेन टकारे कृते षट्सन्तः इति रूपं सिद्धम्।

अन्यानि उदाहरणानि -

सम्राड् + सत्यः = सम्राट्त्सत्यः, सम्राट्सत्यः। लिड् + सु = लिट्त्सु, लिट्सु इत्यादीनि।

८७. नान्तात् = नकारान्तात् परस्य सस्य अपि आदौ विकल्पेन धुडागमः भवति।

उदाहरणस्य विश्लेषणम् -

सन् + सः इत्यत्र सन् इति नकारान्तं पदम् अस्ति। ततः परश्च 'सः' इति सकारः वर्तते। अस्य सकारस्य अनेन सूत्रेण विकल्पेन आदौ धुडागमः क्रियते, तस्य च चर्त्वे सन्त्सः इति रूपम्। धुडभावे तु सन्सः इति।

रूपलेखनप्रकारः -

सन् + सः इत्यत्र ''नश्च'' इति सूत्रेण नकारात् परस्य सस्य आदौ विकल्पेन धुडागमेऽनुबन्धलोपे च कृते सन् + ध् + सः इति जाते ''खरि च'' इति सूत्रेण धस्य चर्त्वेन तकारे कृते सन्त्सः इति रूपम्। धुडभावे तु सन्सः इति रूपमपि सिद्धम्।

अन्यानि उदाहरणानि -

त्रीन् + समुद्रान् = त्रीन्त्समुद्रान्, त्रीन्समुद्रान्। भगवान् + साधुं रक्षति = भगवान्त्साधुं, भगवान्साधुं रक्षति। विद्वान् + सहते = विद्वान्त्सहते, विद्वान्सहते इत्यादीनि।

८८. पदान्तः यः नकारः, तस्मात् शकारे परे, तस्य नकारस्य (तुक्) तुगागमः विकल्पेन भवति। तुक् इत्यत्र त् अवशिष्यते। अत्र ककारस्य इत्संज्ञात्वात् अयमागमः कित् अस्ति। अतः अयम् अन्तावयवत्वेन तिष्ठति।

रूपलेखनप्रकारः -

सन् + शम्भुः इत्यत्र ''शि तुक्'' इति सूत्रेण नस्य विकल्पेन तुगागमेऽनुबन्धलोपे सन् + त् + शम्भुः इति स्थिते ''स्तोः श्चुना श्चुः'' इति सूत्रेण शकारयोगे तकारस्य चुत्वेन चकारे पुनश्च चकारयोगे नस्य ञकारे सञ्च्शम्भुः इत्यवस्थायां ''शश्छोऽटि'' इति सूत्रेण शस्य विकल्पेन छकारे सञ्च्छम्भुः इति स्थिते ''झरो झरि सवर्णे'' इति सूत्रेण विकल्पेन चकारस्य लोपे सञ्छम्भुः इति रूपम्। चलोपाभावे सञ्च्छम्भुः इति द्वितीयं रूपम्। छत्वाभावे चलोपाभावे च सञ्च्शम्भुः इति तृतीयं तथा तुगभावे सञ्शम्भुः इति चतुर्थं रूपं सिद्धम्।

८९. ङमः ह्रस्वाद् अचि ङमुट् नित्यम् इतिच्छेदः। ङम् इति प्रत्याहारः 'ङ् ण् न्' इति वर्णानां बोधकः। ङमुट् इति (ङम्+उट्) प्रत्येकं वर्णस्य उट्संयोगः अर्थात् ङुट्, णुट्, नुट् इति तात्पर्यम्। अतः सूत्रार्थः इत्थं करणीयः-ह्रस्वात् परः यः ङम् (ङ् ण् न्) तदन्तात् अचि परे सति, तस्य अचः आदौ ङमुडागमः भवति। अर्थात् ङकारात् परस्य अचः ङुट्, णकारत्परस्य णुट्, नकारात्परस्य च नुट् भवति इत्याशयः।

९०. **समः सुटि ८/३/५**
समो रुः सुटि।

९१. **अत्रानुनासिकः पूर्वस्य तु वा ८/३/२**
अत्र रुप्रकरणे रोः पूर्वस्य अनुनासिको वा।

९२. **अनुनासिकात्परोऽनुस्वारः ८/३/२**
अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः।

९३. **खरवसानयोर्विसर्जनीयः ८/३/१५**
खरि अवसाने च पदान्तस्य रेफस्य विसर्गः स्यात्।
(सम्पुङ्कानां सो वक्तव्यः) सँस्स्कर्ता।, संस्स्कर्ता।

उदाहरणस्य विश्लेषणम् –

प्रत्यङ् + आत्मा इत्यत्र ह्रस्वात्परः ङम् ङकारः, तस्मात् परः 'आत्मा' इत्याकारः अच्, अस्य अचः आद्यवयवत्वेन ङुडागमः अनुबन्धलोपश्च भवति, अतः प्रत्यङ् + ङ् + आत्मा = प्रत्यङ्ङात्मा इति रूपम्। सुगण् + ईशः = सुगण् ण् ईशः = सुगण्णीशः। सन् + अच्युतः सन् + न् + अच्युतः = सन्नच्युतः इत्येवम्।

रूपलेखनप्रकारः –

प्रत्यङ् + आत्मा इत्यत्र "ङमो ह्रस्वादचि ङमुण् नित्यम्" इति सूत्रेण ङमः (ङकारात्) परस्य "आत्मा" इत्याकाररूपस्य अचः आदौ ङुडागमेऽनुबन्धलोपे प्रत्यङ् + ङ् + आत्मा इति दशायां वर्णसम्मेलने 'प्रत्यङ्ङात्मा' इति रूपं सिद्धम्। सुगण् + ईशः इत्यत्र णुट्, सन् + अच्युतः इत्यत्र नुट् भवति इति ध्येयम्।

अन्यानि उदाहणानि –

अस्मिन् + अपि = अस्मिन्नपि, हसन् + अश्नाति = हसन्नश्नाति इत्यादीनि।

९०. सम् इति उपसर्गस्य सुडागमे परे रुः भवति। स च तस्य अन्त्यस्य मकारस्य विधेयः 'अलोन्त्यस्य' इति न्यायात्। यथा सम् + स्कर्ता इत्यत्र मकारात् सुट् परः अस्ति, अतः मस्य रुत्वे सरु + स्कर्ता इति स्थिते –

९१. अत्र = रुप्रकरणे अर्थात् यत्र रुः भवति, तस्मिन् प्रकरणे रोः पूर्वस्य विकल्पेन अनुनासिकः भवति। तद्यथा – सँ रु + स्कर्ता इति जाते – –

९२. रुप्रकरणे यत्र अनुनासिकः न भवति, तस्मिन् पक्षे रोः पूर्वस्मात् अचः परः अनुस्वारागमः भवति। इत्थं रुप्रकरणे एकपक्षे अनुनासिकः, अपरत्र अनुस्वारश्च रोः पूर्वस्मात् परः भवति। तद्यथा – सँरु + स्कर्ता, संरु + स्कर्ता इत्येवं पक्षद्वयम्।

९३. खर् + अवसानयोः विसर्जनीयः। अर्थात् खरि परे अवसाने च पदान्तस्य रेफस्य विसर्गः भवति। विसर्जनीयः = विसर्गः। सँरु + स्कर्ता, संरु +स्कर्ता इत्यत्र 'रु' इत्यस्य उकारस्य अनुनासिकत्वप्रतिज्ञया "उपदेशेऽजनुनासिक इत्" इति सूत्रेण इत्संज्ञायां 'तस्य लोपः" इत्यनेन लोपे कृते सँर् + स्कर्ता, संर् + स्कर्ता इति स्थितौ "खरवसानयोर्विसर्जनीयः" इति सूत्रेण खरि परे रोः रेफस्य विसर्गे प्राप्ते ....

वार्तिकम् –

"संम्पुङ्कानां सो वक्तव्यः"। 'सम् पुम् कान्' इत्येषां यः रुः, तस्य रेफस्य सकारः भवति, न तु विसर्जनीयः। अत्र सँर् + स्कर्ता, संर् + स्कर्ता इत्यत्र समः रेफस्य सत्त्वात्, तत्स्थाने सत्वम् अनेन वार्तिकेन भवति, अतः संस्स्कर्ता, संस्स्कर्ता इति रुपद्वयं सिद्धं भवति।

९४. **पुमः खय्यम्परे ८/३/६**
अम्परे खयि पुमो रुः। पुँस्कोकिलः, पुंस्कोकिलः।

९५. **नश्छव्यप्रशान् ८/३/७**
अम्परे छवि नान्तस्य पदस्य रुः स्यात्।

९६. **विसर्जनीयस्य सः ८/३/३४**
खरि। चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व। अप्रशान् किम?प्रशान्तनोति। पदान्तस्येति किम् ? हन्ति।

रूपलेखनप्रकारः -

सम् + स्कर्ता इत्यत्र मस्य 'मोऽनुस्वारः' इत्यनुस्वारे प्राप्ते तत्प्रबाध्य ''समः सुटि'' इति सूत्रेण समः मस्य रुत्वे 'अनुबन्धलोपे च कृते सर् + स्कर्ता इति स्थिते ''अत्रानुनासिकः पूर्वस्य तु वा'' इति सूत्रेण रोः पूर्वस्य विकल्पेन अनुनासिके कृते पक्षे ''अनुनासिकात्परोऽनुस्वारः'' इत्यनेन अनुस्वारागमे च कृते सँर् + स्कर्ता, संर् + स्कर्ता इति स्थितौ ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफस्य स्थाने विसर्गे प्राप्ते, तत्प्रबाध्य ''सम्पुङ्कानां सो वक्तव्यः ''इति वार्तिकेन रेफस्य सकारे कृते सँस्कर्ता, संस्कर्ता इति रूपद्वयं सिद्धम्।

अन्यानि उदाहरणानि -

सँस्कारः, संस्कारः। सँस्कृतिः, संस्कृतिः। (अलङ्करणम् इत्यर्थः)

९४. **पुमः खयि अम्परे** इतिच्छेदः। खय् इति प्रत्याहारः, तत्र वर्गाणां प्रथमद्वितीयाः वर्णाः भवन्ति। अम्प्रत्याहारान्तर्गताः वर्णाः यदि खयः परतः विद्यमानाः स्युः, तादृशः खय् अम्परः इत्युच्यते। अम्परे खयि परे पुम् शब्दस्य मकारस्य रुत्वं भवति इति सूत्राशयः।

उदाहरणस्य विश्लेषणम् -

पुम् + कोकिलः इत्यत्र पुमः परतः कोकिलशब्दस्य ककारः खय् विद्यते, तस्माच्च परः ओकारः अम्। अतः पुम् शब्दात् परतः अम्परकस्य खयः विद्यमानत्वात् अनेन सूत्रेण मस्य रुत्वं विधीयते, अन्यत्सर्वं सँस्कर्ता इतिवत्कार्यम्।

रूपलेखनप्रकारः -

पुम् + कोकिलः इत्यत्र ''पुमः खय्यम्परे'' इति सूत्रेण मस्य रुत्वे अनुबन्धलोपे पुर् + कोकिलः इति स्थिते ''अत्रानुनासिकः पूर्वस्य तु वा'' इति अनुनासिके वैकल्पिके कृते, पक्षे ''अनुनासिकात्परोऽनुस्वारः'' इत्यनुस्वारागमे पुँर् + कोकिलः पुंर् + कोकिलः इति जाते, रेफस्य ''खरवसानयो॰'' इति विसर्गे प्राप्ते तम्प्रबाध्य ''सम्पुङ्कानां सो वक्तव्यः'' इति वार्तिकेन रेफस्य सकारे कृते पुँस्कोकिलः, पुंस्कोकिलः इति रुपद्वयं सिद्धम्।

अन्यानि उदाहरणानि -

पुम् + चरित्रम् = पुँश्चरित्रम्, पुंश्चरित्रम्। पुम् + खनित्रम् = पुँस्खनित्रम्, पुंस्खनित्रम् इत्यादीनि।

९५. **नः छवि अप्रशान्** इतिच्छेदः। अम्परके छवि परे सति नान्तस्य पदस्य रुः भवति, प्रशान् इति प्रदस्य तु न। 'अलोऽन्त्यस्य' इत्यनुसारं नान्तस्य पदस्य अन्त्यनकारस्य इति फलितम्।

उदाहरणस्य विश्लेषणम् -

चक्रिन् + त्रायस्व इत्यत्र 'चक्रिन्' इति नान्तं पदम्, ततश्च परः अम्परकः छव् 'त्र' इति विद्यते। तादृशे छवि परे चक्रिन् इति नान्तस्य पदस्य ''अलोऽन्त्यस्य'' इत्यनुसारम् अन्त्यस्य नकाररूपस्य अलः स्थाने अनेन रुत्वं विधीयते। ततश्च रुत्वप्रकरणे अनुनासिकत्वे अनुस्वारागमे रेफस्य विसर्गे च कृते चक्रिँः+त्रायस्व, चक्रिंः+त्रायस्व इति स्थिते विर्गस्य सत्वविधायकं सूत्रम् आह - ''विसर्जनीयस्य सः'' इति।

९६. खरि परे विसर्गस्य स्थाने सकारः भवति।

उदाहरणस्य विश्लेषणम् -

'त्रायस्व' इत्यत्र तकारः खरन्तर्गतः। तस्मिन् परे विसर्गस्य अनेन सकारः विधीयते चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व इति।

९७. **नॄन्पे ८/३/१०**
नॄनित्यस्य रुर्वा पे।

९८. **कुप्वोः ⨯ क ⨯ पौ च ८/३/३७**
कवर्गे पवर्गे च विसर्गस्य ⨯ क ⨯ पौ स्तः, चाद्विसर्गः।
नॄँ⨯पाहि, नॄं⨯पाहि, नॄँः पाहि, नॄंः पाहि, नॄन् पाहि।

रुपलेखनप्रकारः –

चक्रिन् + त्रायस्व इत्यत्र ''नश्छव्यप्रशान्'' इति नस्य रुत्वेऽनुबन्धलोपे पूर्वस्य अनुनासिके, पक्षे अनुस्वारागमे ''खरवसानयोर्विसर्जनीयः'' रेफस्य च विसर्गे कृते ''विसर्जनीयस्य सः'' इति सूत्रेण विसर्गस्य स्थाने सकारे कृते चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व इति रूपद्वयं सिद्धम्।

विशेषः –

''नश्छव्यप्रशान्'' इति सूत्रेण प्रशान् शब्दस्य नस्य रुत्वं न भवति, अतः 'अप्रशान्' इत्युक्तं सूत्रे। यदि सूत्रे अप्रशान् इति निषेधः नाभविष्यत् तदा तु प्रशान्तनोति इत्यत्रापि नस्य रुत्वापत्तिः आपतिष्यत्। यदि'पदान्तस्य' इति न उच्येत तर्हि अपदान्तस्य अपि 'हन्ति' इति नस्य रुत्वापत्तिः भवेत्।

अन्यानि उदाहरणानि

विद्वान् + चरति = विद्वाँश्चरति, विद्वांश्चरति। कस्मिन् + तगाडे = कस्मिँस्तडागे, कस्मिंस्तडागे। भवान् + छद्मी = भवाँश्छद्मी, भवांश्छद्मी। पटीयान् + छात्रः = पटीयाँश्छात्रः, पटीयांश्छात्रः। चञ्चुमान् + टिट्टिभः = चञ्चुमाँष्टिट्टिभः, चञ्चुमांष्टिट्टिभः इत्यादीनि।

९७. **नॄन् पे** इतिच्छेदः। पे = पकारे। पकारे परे '**नॄन्**' इति पदस्य ''अलोऽन्त्यस्य'' इति परिभाषया अन्त्यस्य नस्य विकल्पेन रुः भवति इति सूत्राशयः।

उदाहरणस्य विश्लेषणम् –

नॄन् + पाहि इत्यत्र नॄन् इति नकारात्परः 'पाहि' इत्यस्य पकारः विद्यमानः। अतः अस्य नस्य अनेन रुत्वं भवति, जाते च रुत्वे अनुनासिके, अनुस्वारागमे च नॄँर् + पाहि, नॄंर् + पाहि इत्यवस्थायां रेफस्य विसर्गे सति नॄँः पाहि, नॄंः पाहि इति स्थितौ –

९८. कुश्च पुश्च कुपू तयोः कुप्वोः। अर्थात् कवर्गे पवर्गे च परे विसर्गस्य क्रमशः जिह्वामूलीयः उपध्मानीयश्च भवति। विसर्गस्य विसर्गः अपि भवति इति सूत्रस्य तात्पर्यम्।

उदाहरणस्य विश्लेषणम् –

नॄँः पाहि, नॄंः पाहि इत्यवस्थायां पवर्गपरत्वात् विसर्गस्य उपध्मानीयः अनेन विधीयते, विसर्गस्य विसर्गः अपि पक्षे भवति। अतः नॄँ⨯पाहि, नॄं⨯पाहि, नॄँःपाहि, नॄंःपाहि इति रूपचतुष्कम्। रुत्वाभावे तु नॄन् पाहि इत्यपि रूपम्।

रूपलेखनप्रकारः –

नॄन् + पाहि इत्यत्र 'नॄन्पे' इति सूत्रेण ''अलोऽन्त्यस्य'' इति परिभाषासहकारेण विकल्पेन नस्य रुत्वेऽनुबन्धलोपे च कृते नॄर्+पाहि इति स्थितौ, रोः पूर्वस्य अनुनासिके, पक्षे अनुस्वारागमे च कृते ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफस्य विसर्गे नॄँः पाहि, नॄंः पाहि इत्यवस्थायां ''कुप्वोः ⨯क⨯पौ च'' इति सूत्रेण विसर्गस्य उपध्मानीये, पक्षे विसर्गस्य विसर्गे च कृते नॄँ⨯पाहि, नॄं⨯पाहि, नॄँः पाहि, नॄंः पाहि इति रूपाणि सिध्यन्ति। रुत्वाभावे तु नॄन् पाहि इत्यपि साधुः प्रयोगः।

अन्यानि उदाहणानि –

नॄन् + प्रति = नॄँ ⨯ प्रति, नॄं ⨯ प्रति, नॄँः प्रति, नॄंः प्रति, नॄन्प्रति। नॄन्+पालयति, नॄन्प्रतिषेधति इत्यादीनि।

९९. तस्य परमाम्रेडितम् ८/१/२

द्विरुक्तस्य परमाम्रेडितं स्यात्।

१००. कानाम्रेडिते ८/३/१२

कान्नकारस्य रुः स्यादाम्रेडिते परे। काँस्कान्, कांस्कान्।

१०१. छे च ६/१/७२

ह्रस्वस्य छे तुग्वा। शिवच्छाया।

---

९९. वीप्सार्थे शब्दस्य द्वित्वं भवति। तत्र द्विवारम् उक्तस्य यत् परम् = उत्तरं द्वितीयं वा पदं भवति, तस्य आम्रेडितसंज्ञा भवति। सूत्रमिदम् आम्रेडितसंज्ञाविधायकम्। यथा वीप्सायां कान् इत्यस्य द्वित्वे कृते 'कान् कान्' इति प्रयोगे परस्य 'कान्' इत्यस्य अनेन आम्रेडितसंज्ञा क्रियते। तस्याः संज्ञायाः अत्र किं प्रयोजनम् इति जिज्ञासायाम् वक्ष्यते 'कानाम्रेडिते' इति।

१००. कान् + आम्रेडिते इतिच्छेदः। आम्रेडिते = आम्रेडितसंज्ञके परे पूर्वस्य कान् शब्दस्य रुत्वं भवति। तच्च 'अलोऽन्त्यस्य' परिभाषया नकारस्य भवति इति व्यवस्था। अतः वृत्तौ लिखितम् - कान्नकारस्य इति। कानः नकारस्यइति भावः।

उदाहरणस्य विश्लेषणम् -

कान् कान् इति वीप्सायां द्वित्वे परस्य आम्रेडितसंज्ञायाम्, आम्रेडिते परे पूर्वस्य कानः नस्य रुत्वे अनुनासिके, अनुस्वारागमे, कृते रेफस्य विसर्गे प्राप्ते ''सम्पुङ्कानां.'' इति वार्तिकेन सकारे काँस्कान्, कांस्कान् इति।

रूपलेखनप्रकारः -

कान् + कान् इत्यत्र ''तस्य परमाम्रेडितम्'' इति सूत्रेण परस्य कान् शब्दस्य आम्रेडितसंज्ञायां कृतायां ''कानाम्रेडिते'' इति सूत्रेण 'अलोऽन्त्यस्य' इति परिभाषासहकारेण पूर्वस्य कान्शब्दस्य नकारस्य रुत्वे अनुबन्ध लोपे रोः पूर्वस्य ''अत्रानुनासिकः पूर्वस्य तु वा'' इति सूत्रेण अनुनासिके, पक्षे च 'अनुनासिकात्परोऽनुस्वारः'' इति सूत्रेण अनुस्वारागमे काँर् + कान्, कांर् + कान् इति जाते ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफस्य विसर्गे प्राप्ते तं प्रबाध्य ''सम्पुङ्कानां सो वक्तव्यः'' इति वार्तिकेन रेफस्य सकारे कृते काँस्कान्, कांस्कान् इति द्वे रूपे सिद्ध्यतः।

१०१. छकारे परे ह्रस्वस्य अचः 'तुक्' भवति। अयञ्च कित्। कित्त्वात् अचः अन्तावयवत्वेन प्रयुज्यते।

उदाहरणस्य विश्लेषणम् -

शिव+छाया इत्यत्र ह्रस्वात् अकारात् परः छकारः विद्यते, तस्मिन् छकारे परे ह्रस्वस्य अकारस्य अन्तावयवः तुगागमः विधीयते, तस्य च छकारयोगे श्चुत्वे कृते शिवच्छाया इति।

रूपलेखनप्रकारः -

शिव+छाया इत्यत्र ''छे च'' इति सूत्रेण ''आद्यन्तौ टकितौ'' इति सहकारेण ह्रस्वस्य अकारस्य अन्तावयवे तुगागमेऽनुबन्धलोपे च कृते शिव त् छाया इति स्थितौ ''स्तोःश्चुना श्चुः'' इत्यनेन श्चुत्वे प्राप्ते, तस्य असिद्धत्वात् पूर्वं ''झलां जशोऽन्ते'' इति सूत्रेण जश्त्वेन तकारस्य दकारे शिव द् छाया इति जाते 'खरि च' इति चर्त्वे प्राप्ते, तस्यापि असिद्धत्वात् पूर्व ''स्तोः श्चुना श्चुः'' इत्यनेन चुत्वेन दस्य जकारे कृते शिवज् छाया इति स्थिते ''खरि च'' इत्यनेन चर्त्वेन जस्य चकारे कृते 'शिवच्छाया' इति रूपं सिद्धम्।

अन्यानि उदाहरणानि -

पदच्छेदः, वृक्षच्छाया, एकच्छत्रम्, गृहच्छादनम्, तृणच्छेद्यम् इत्यादीनि।

९०२. 'पदान्ताद् वा ६/१/७३

दीर्घात् पदान्ताच्छे तुग्वा। लक्ष्मीच्छाया, लक्ष्मीछाया।

''इति हल्सन्धिः''

---

१०२. पदान्तात् दीर्घात् छे परे वैकल्पिकः तुक् भवति। अर्थात् पदान्ते यः दीर्घः स्वरः, तस्य अन्तावयवः तुक् भवति छकारे परे सति इति सूत्राशयः।

उदाहरणस्य विश्लेषणम् -

लक्ष्मीच्छाया, लक्ष्मीछाया इति। लक्ष्मी इति पदम्, तत्र पदान्ते दीर्घः ईकारः, तस्माच्च परः छाया इति छकारः। तस्मिन् छकारे परे पदान्तस्य दीर्घस्य ईकारस्य अन्तावयवः तुक् अनेन विधीयते। अयं तुगागमः विकल्पेन भवति, अतः पक्षे लक्ष्मीछाया इत्यपि रूपम्।

रूपलेखनप्रकारः -

लक्ष्मी+छाया इत्यत्र ''पदान्ताद् वा'' इति सूत्रेण विकल्पेन ईकारस्य अन्तावयवे तुगागमे लक्ष्मी+त्+ छाया इति स्थिते तकारस्य जश्त्वेन दकारे, दस्य चुत्वेन जकारे,जस्य च चर्त्वेन चकारे कृते लक्ष्मीच्छाया इति रूपम्। तुगभावे लक्ष्मीछाया इति रूपं सिद्धम्।

<u>इति हल्सन्धिः</u>

<u>अभ्यासार्थ प्रश्नाः</u>

वस्तुनिष्ठप्रश्नाः -

१. रामस् + शेते इत्यत्र सन्धियुक्तं स्वरूपमस्ति
(क) रामो शेते (ख) राम शेते
(ग) रामश्शेते (घ) रामर् शेते ( )

२. 'झलां जशोऽन्ते' इत्यनेन पदान्ते स्युः -
(क) चरः (ख) हलः
(ग) जशः (घ) यरः ( )

३. अनुनासिकसन्धेरुदाहरणमस्ति
(क) रामष्टीकते (ख) एतन्मुरारिः
(ग) वागीशः (घ) उत्थानम् ( )

४. 'उत्थानम्' इत्यत्र सन्धिविच्छेदोऽस्ति -
(क) उद् + स्थानम् (ख) उद् + थानम्
(ग) उत्थ + थानम् (घ) उदः स्थानम् ( )

५. खरि झलां स्युः
(क) जशः (ख) चरः
(ग) यरः (घ) अचः ( )

६. झयः परस्य हस्य वा भवति -
(क) अनुनासिकः (ख) परस्वर्णः
(ग) पूर्वसवर्णः (घ) अनुस्वारः ( )

७. मान्तस्य पदस्यानुस्वारो भवति -
(क) खरि (ख) झरि
(ग) अटि (घ) हलि ( )

८. परसवर्णस्योदाहरणमस्ति -
(क) शान्तः (ख) वाग्घरिः
(ग) सम्राट् (घ) हरिं वन्दे ( )

९. आद्यन्तावयवौ स्तः -
(क) परसवर्ण - पूर्वसवर्णौ (ख) अज्झलौ
(ग) अनुस्वारानुनासिकौ (घ) टित्कितौ ( )

१०. कुगभावे रूपं भवति -
(क) प्राङ्ख्षष्ठः (ख) प्राङ्क्षष्ठः
(ग) प्राङ् षष्ठः (घ) प्राङ्ग्षष्ठः ( )

११. पदान्तस्य नस्य शि परे वा भवति -
(क) कुक् (ख) टुक्
(ग) तुक् (घ) धुट् ( )

१२. 'समः सुटि' इत्यनेन भवति -
(क) तुक् (ख) सुट्
(ग) रुः (घ) ङमुट् ( )

१३. द्विरुक्तस्य परं भवति -
(क) सवर्णसंज्ञम् (ख) इत्संज्ञम्
(ग) आम्रेडित-संज्ञम् (घ) वृद्धिसंज्ञम् ( )

१४. श्चुत्वविधायकं सूत्रं विलिख्य तदुदाहरणानि लेख्यानि।

१५. अधोऽङ्कितानां पदानां प्रयोगसिद्धिः कार्या।
प्रश्नः, वाग्घरिः, षट्सन्तः, सुगण्णीशः।

१६. धुडागमः कदा भवति ? सोदाहरणं विवेचनीयम्।

अथ विसर्गसन्धिः

१०३. विसर्जनीयस्य सः ८/३/३४
खरि। विष्णुस्त्राता।

१०४. वा शरि ८/३/३६
शरि विसर्गस्य विसर्गो वा। हरिः शेते, हरिश्शेते।

१०५. ससजुषो रुः ८/२/६६
पदान्तस्य सस्य सजुषश्च रुःस्यात्।

---

१०३. खरि परे विसर्गस्य सः भवति इति सूत्रार्थः।

उदाहरणस्य विश्लेषणम् -

विष्णुः + त्राता इत्यत्र विष्णुः इत्यत्र यः विसर्गः, तस्मात् परः त्राता इति तकारः खर्वर्णः। अतः अस्य विसर्गस्य स्थाने अनेन सकारादेशः भवति।

रूपलेखनप्रकारः -

विष्णुः+ त्राता इत्यत्र ''विसर्जनीयस्य स'' इति सूत्रेण विसर्गस्य स्थाने 'स्' आदेशे कृते'' विष्णुस्त्राता इति सिद्धम्।

अन्यानि उदहाणानि -

बालकः + तिष्ठति=बालकस्तिष्ठति, गौः + चरति = गौश्चरति इत्यादीनि।

विशेष : खर् प्रत्याहारान्तर्गतेषु के खे च परे विसर्गस्य जिह्वामूलीयः, पे फे परे तु उपध्मानीयः वा भवति। सूत्रं ''कुप्वोः ⨯ क ⨯ पौ च''। पक्षे विसर्गस्य विसर्गः अपि। रामः करोति, राम ⨯ करोति। देवदत्तः पचति, देवदत्त ⨯ पचति।

१०४. शरि प्रत्याहारे परे विसर्गस्य विकल्पेन विसर्ग एव भवति। पक्षे तु शरः अपि खरन्तर्गतत्वात् 'विसर्जनीस्य सः' इति स् अपि भवति।

उदाहरणस्य विश्लेषणम् -

हरिः + शेते इत्यत्र विसर्गात् शर् परः विद्यते। अतः विसर्गस्य अनेन विसर्गे 'हरिः शेते' इति। पक्षे तु सादेशे श्चुत्वे 'हरिश्शेते' इति रूपम्।

रूपलेखनप्रकारः -

हरिः + शेते इत्यत्र ''विसर्जनीयस्य सः'' इति सूत्रेण विसर्गस्य स्थाने सकारादेशे प्राप्ते, तं प्रबाध्य ''वा शरि'' इति सूत्रेण विकल्पेन विसर्गस्य विसर्गे एव कृते 'हरिः शेते' इति रूपम्। पक्षे तु विसर्गस्य सकारादेशे कृते हरिस्+शेते इत्यवस्थायां ''स्तोःश्चुना श्चुः'' इति सूत्रेण सस्य शकारयोगे शकारे कृते 'हरिश्शेते' इति रूपं सिद्धम्।

अन्यानि उदाहरणानि -

रामः शृणोति रामश्शृणोति। पदार्थाः + सप्त = पदार्थाः सप्त, पदार्थास्सप्त इत्यादीनि।

१०५. स-सजुषोः रुः। पदस्य अन्ते स्थितस्य सस्य तथा सजुष् शब्दस्य अन्तिमवर्णस्य 'ष्' इत्यस्य रुः भवति।

उदाहरणस्य विश्लेषणम् -

'शिवस् + अर्च्यः इत्यत्र 'शिवस्' इति पदम् अस्ति, अस्य अन्ते सकारः विद्यमानः, तस्य सकारस्य अनेन रुत्वं विधीयते। 'रु' इत्यस्य उकारस्य इत्संज्ञायां लोपे च र् इति शिष्यते इति ध्येयम्। अतः शिवर् + अर्च्यः इति जाते -

१०६. अतो रोरप्लुतादप्लुते ६/१/११३

अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। शिवोऽर्च्यः।

१०७. हशि च ६/१/११४

तथा। शिवो वन्द्यः।

१०८. भोभगोअघोअपूर्वस्य योऽशि ८/३/१७

एतत्पूर्वस्य रोर्यादेशोऽशि। देवा इह, देवायिह।

भोस्, भगोस् अघोस् इति सान्ताः निपाताः। तेषां रोर्यत्वे कृते –

---

१०६. अतः रोः अप्लुतात् अप्लुते इतिच्छेदः। 'अतः' इत्यत्र तपरत्वं कृतम् अस्ति, अतः अकारः समकालस्यैव अत्र ग्राहकः। 'अप्लुतात्' इति 'अतः' इति पदस्य विशेषणम्। सूत्रार्थः–अप्लुतात् अकारात् परः यः रुः, तस्य रोः स्थाने (रोः अवशिष्टस्य रेफस्य स्थाने) 'उः' भवति अप्लुते अकारे परे इति।

उदाहरणस्य विश्लेषणम् –

शिवर् (रु) + अर्च्यः इत्यत्र 'शिव' इति वकारोत्तरवर्तिनः अप्लुतात् अकारात् परः रुः विद्यते, तस्य स्थाने अनेन उत्वं भवति, यतो हि तस्मात् रोः परः अप्लुतः अकार (अर्च्यः इति) विद्यते। अतः शिव+उ+अर्च्यः इति स्थितिः जाता गुणैकादेशे पूर्वरूपे च कृते 'शिवोऽर्च्यः' इति।

रूपलेखनप्रकारः –

शिवस् + अर्च्यः इत्यत्र ''ससजुषो रुः'' इति सूत्रेण सस्य स्थाने 'रु' आदेशेऽनुबन्धलोपे च कृते शिव+र् + अर्च्यः इति स्थिते ''अतो रोरप्लुतादप्लुते'' इति सूत्रेण रेफस्य 'उ' आदेशे शिव+उ+अर्च्यः इति जाते ''आद्गुणः'' इति सूत्रेण पूर्वपरयोः अकार–उकारयोः स्थाने गुणैकादेशे शिवो+अर्च्यः इति स्थितौ ''एङःपदान्तादति'' इति सूत्रेण पूर्वरूपैकादेशे कृते ''शिवोऽर्च्यः'' इति सिद्धम्।

अन्यानि उदाहणानि –

रामस् + अयम् = रामोऽयम्। सस् + अपि = सोऽपि। उपस्थितस् + अस्मि = उपस्थितोऽस्मि इत्यादीनि।

१०७. अप्लुतात् अकारात् परस्य रोः (रेफस्य) उत्वं भवति हशि परे सति इति सूत्रार्थः। हश्प्रत्याहारे परे इति भावः।

उदाहरणस्य विश्लेषणम् –

शिवस्+वन्द्यः इत्यत्र सस्य रुत्वे शिव र् (रु) + वन्द्यः इति स्थितौ, अयं रुः अप्लुतात् अकारात् परः विद्यते, रोः परश्च हश् प्रत्याहारवर्णः वकारः अस्ति, अतः 'हशि च' इत्यनेन उत्वे शिव उ वन्द्यः इति जाते गुणे शिवो वन्द्यः इति।

रूपलेखनप्रकारः –

'शिवर्+वन्द्यः' इत्यत्र ''ससजुषो रुः' इति सूत्रेण सस्य रुत्वेऽनुबन्धलोपे च कृते शिवर् + वन्द्यः इति जाते ''हशि च'' इति सूत्रेण रोः स्थाने उत्वे कृते सति शिव उ वन्द्यः इति स्थिते ''आद् गुणः'' इति सूत्रेण गुणैकादेशे 'शिवोवन्द्यः' इति रूपं सिद्धम्।

अन्यानि उदाहरणानि –

छात्रस् + गच्छति = छात्रो गच्छति। बालकस् + हसति इत्यादीनि।

१०८. भो भगो अघो अपूर्वस्य यः अशि इतिच्छेदः। भो पूर्वस्य, भगोपूर्वस्य अघोपूर्वस्य, अकारः पूर्वः यस्मात्, तस्य = अपूर्वस्य रोः यकारादेशः भवति अशि = अश्प्रत्याहारवर्णे परे।

उदाहरणस्य विश्लेषणम् –

देवास् + इह इत्यत्र सस्य रुत्वे कृते देवार् + इह इति स्थितौ अकारपूर्वकस्य रोः (रेफस्य) अनेन सूत्रेण यकारः विधीयते, यतो हि अस्मात् रोः परः अश्वर्णः इकारः विद्यते। अतः देवाय् + इह इति स्थितिः जाता – ततश्च यलोपः।

१०९. हलि सर्वेषाम् ८/३/२२
भोभगोअघोअपूर्वस्य यस्य लोपः स्याद्धलि। भो देवाः।
भगो नमस्ते। अघो याहि।

११०. रोऽसुपि ८/३/३९
अह्नो रेफादेशो न तु सुपि। अहरहः। अहर्गणः।

१११. रो रि ८/३/१४
रेफस्य रेफे परे लोपः।

रूपलेखनप्रकारः -

देवास् + इह इत्यत्र ''ससजुषो रुः'' इति सूत्रेण सस्य रुत्वेऽनुबन्धलोपे देवार् + इह इति स्थितौ ''भो भगोअघोअपूर्वस्य योऽशि'' इति सूत्रेण रेफस्य स्थाने 'य्' आदेशे कृते देवाय् + इह इति जाते ''लोपः शाकल्यस्य'' इति सूत्रेण विकल्पेन य्लोपे देवा इह इति रूपम्। यलोपाभावे देवायिह इति रूपम्। देवा इह इत्यत्र गुणः तु न भवति, यलोपस्य गुणदृष्ट्या असिद्धत्वात्।

विशेषः भोस् भगोस् अघोस् इति सकारान्ताः निपाताः सन्ति, एषां प्रत्येकं सस्य रुत्वे भोर् भगोर् अघोर् इत्यवस्थायां प्रत्येकं रोः भोभगोअघोपूर्वत्वात् अनेन सूत्रेण यकारे कृते भोय्, भगोय् अघोय् इति स्थिते।

१०९. भोपूर्वस्य भगोपूर्वस्य अघोपूर्वस्य अकारपूर्वस्य च यकारस्य लोपः भवति हलि = व्यञ्जने वर्णे परे इति सर्वेषां मतम्।

उदाहरणस्य विश्लेषणम् -

भोय् + देवा, भगोय् + नमस्ते, अघोय् + याहि इत्यादौ एतत्पूर्वकस्य यकारस्य अनेन लोपः भवति। अतः भो देवाः। भगो नमस्ते। अघो याहि इति प्रयोगाः।

रूपलेखनप्रकारः -

भोस् + देवाः इत्यत्र ''ससजुषो रुः + इति सूत्रेण सस्य रुत्वेऽनुबन्धलोपे भोर् + देवाः इति जाते ''भोभगोअघोअपूर्वस्य योऽशि'' इति सूत्रेण रोः यकारे कृते भोय् + देवा इति जाते ''हलि सर्वेषाम्'' इति सूत्रेण यलोपे कृते भो देवाः इति सिद्धम्। एवमेव भगो नमस्ते, अघो याहि इत्याद्यपि ज्ञेयम्।

११०. रः असुपि इतिच्छेदः। 'अहन्' इत्यस्य रेफादेशः भवति, सुपि परे तु न भवति, अतः सुब्भिन्ने परे इति फलितम्। ''अलोऽन्त्यस्य'' इति परिभाषया अन्त्यस्य अलः नस्य रेफादेशः इति निष्कृष्टः अर्थः।

उदाहरणस्य विश्लेषणम् -

अहन् + अहः इत्यत्र 'अहन्' इति पूर्वपदम्। ततः परः सुप् नास्ति, अपितु सुब्भिन्नः 'अहः' इतिशब्दः। अतः नस्य रेफादेशः अहर् + अहः = अहरहः इति। एवमेव अहन् + गणः = अहर् + गण = अहर्गणः इति।

रूपलेखनप्रकारः -

अहन् + अहः इत्यत्र ''रोऽसुपि'' इति सूत्रेण 'अलोऽन्त्यस्य'' इति परिभाषासहकारेण अन्त्यस्य नकारस्य रेफादेशे अहर् + अहः इत्यवस्थायां वर्ण सम्मेलने 'अहर्गणः' इति सिद्धम्।

१११. रः रि। रः इति 'र्' इत्यस्य षष्ठ्येकवचनम्। रि इति सप्तम्येकवचनम्। रकारे परे पूर्वस्य रकारस्य लोपः भवति इति सूत्रार्थः।

११२. ढ्रलोपे पूर्वस्य दीर्घोऽणः ६/३/१११

ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः। पुना रमते। हरी रम्यः। शम्भू राजते। अणः किम् ? तृढः। वृढः। मनस् रथ इत्यत्र रुत्वे कृते हशि चेत्युत्वे रो रीति लोपे च प्राप्ते –

११३. विप्रतिषेधे परं कार्यम् १/४/२

तुल्यबलविरोधे परं कार्यं स्यात्। इति लोपे प्राप्ते। पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव। मनोरथः।

उदाहरणस्य विश्लेषणम्

पुनर्+रमते इत्यत्र रेफे परे पूर्वस्य रेफस्य लोपः भवति, अतः पुन+रमते इति स्थितिः। (हरिस् – रुत्वे) हरिर् + रम्यः, (शम्भुस्–) शम्भुर् + राजते इत्यत्रापि रेफे परे पूर्वस्य रेफस्य लोपः भवति। इत्थं पुन+रमते, हरि+ रम्यः, शम्भु+ राजते अत्र रेफस्य लोपः जातः, तस्य च रेफस्य लोपनिमित्तमपि रेफ एव, स च निमित्तरूपः रेफः सम्प्रति परतः विद्यमानः अस्ति। अतः विशेषकार्यं दर्शयन् आह – 'ढ्रलोप.' इति।

११२. ढ्रलोप इति – ढ् च र् च इति ढ्रौ, ढ्रौ लोपयति इति ढ्रलोपः, तस्मिन् ढ्रलोपे। अतः ढलोपनिमित्ते ढकारे परे, रेफलोपनिमित्ते च रकारे परे पूर्वस्य अणः (अ इ उ इति वर्णत्रयस्य) दीर्घः भवति। अर्थात् 'रो रि' इत्यनेन यः रेफलोपः, तस्य निमित्तं परतः स्थित रेफः एव भवति, ढलोपोऽपि ढकारे परे एव भवति ('ढो ढे लोपः' इति सूत्रम्)। तादृशे ढकारस्य रेफस्य च लोपनिमित्ते क्रमशः ढकारे रेफे च परे पूर्वस्य अणः दीर्घविधानं भवति इत्याशयः।

उदाहरणस्य विश्लेषणम् –

पुन + रमते, हरि + रम्यः, शम्भु + राजते इत्यत्र रेफलोपनिमित्तस्य रेफस्य परत्वात् पूर्वस्य अणः क्रमशः अकारस्य, इकारस्य, उकारस्य च दीर्घत्वम् अनेन सूत्रेण विधीयते। अतः पुना रमते, हरी रम्यः शम्भू राजते इति प्रयोगाःउपपद्यन्ते।

रूपलेखनप्रकारः –

हरिस् + रम्यः इत्यत्र "ससजुषो रुः" इति सूत्रेण सस्य रुत्वेऽनुबन्धलोपे हरिर् + रम्यः इति स्थिते "रो रि" इति सूत्रेण रेफे परे पूर्वस्य रेफस्य लोपे कृते हरि+रम्यः इति जाते "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति सूत्रेण रेफलोपनिमित्ते रेफे परे पूर्वस्य इकाररूपस्य अणः दीर्घे कृते हरी रम्यः इति सिद्धम्।

अन्यानि उदाहरणानि –

अन्तर् + राष्ट्रियः = अन्ताराष्ट्रियः। अन्तर् + राज्यम = अन्ताराज्यम्। प्राता राजते। दुष्टाभी राक्षसीभिः। ढलोपस्य तु – लिढ् + ढः = लीढः। उढ् + ढः = ऊढः इत्यादीनि।

प्रश्नः 'ढ्रलोपे.' इत्यत्र अणः दीर्घः भवति इति किमर्थम् उक्तम् ? इति प्रश्ने आह – तृढः। वृढः। अर्थात् यदि अण् इति न उच्येत तर्हि तृढ् + ढः, वृढ् + ढः इत्यत्र ढकारलोपे सति ढलोपनिमित्ते परे पूर्वस्य ऋकारस्य अपि दीर्घत्वं प्राप्नोति। 'अणः' इति कथने तु, न भवति तत्र दीर्घः, ऋकारस्य अण्त्वाभावात् इति उत्तरम्। मनस्+रथः इत्यत्र सस्य "ससजुषो रुः" इति रुत्वेऽनुबन्धलोपे मनर्+रथः इत्यत्र हशपरत्वात्" हशि च" इति सूत्रेण रोः उत्वस्य प्राप्तिः, 'रो रि' इत्यनेन च पूर्वरेफलोपस्य प्राप्तिः युगपत् भवति। तत्र कतरत् कार्यं पूर्वं करणीयम् ? इति व्यवस्थां सम्पादयन् आह "विप्रतिषेधे." इति –

११३. विप्रतिषेधे. = तुल्यबलविरोधे परं कार्यं स्यात्। अन्यत्रान्यत्र कार्याय याभ्यां सूत्राभ्याम् अवसरः प्राप्तः एतादृशकार्य विधायकयोः सूत्रयोः एकत्र युगपत्प्राप्तिः तुल्यबलविरोधः उच्यते। तादृशे प्रसङ्गे पाणिनिकृतसूत्रपाठापेक्षं परवर्ति सूत्रं पूर्वं प्रवर्तते इति व्यवस्था।

उदाहरणे सङ्गतिः –

मनर् रथः इत्यत्र 'हशि च' इत्यस्य 'रो रि' इत्यस्य तुल्यबलयोः विरोधः सञ्जातः। तत्र एतेन सूत्रेण परकार्यं स्यात् इति निर्दिष्टम्। अत्र 'रो रि' इति हि 'हशि च' इत्यपेक्षया परसूत्रम्। अतः 'रो रि' इति पूर्वस्य

११४. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ६/१/१३२

अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि, न तु नञ्समासे।

एष विष्णुः। स शम्भुः। अकोः किम् ? एषको रुद्रः।

अनञ्समासे किम् ? असः शिवः। हलि किम् ? एषोऽत्र।

रेफस्य लोपे प्राप्ते - आह - 'पूर्वत्रासिद्धम्.' इति। रो रि' इत्यस्य त्रैपादिकत्वात् 'हशि च' इति सपादसप्ताध्यायीस्थं प्रति असिद्धत्वात् पूर्वं 'हशि च' इत्यस्यैव प्रवृत्तिः तेन मन + उ + रथः इत्यत्र गुणे मनोरथः इति।

रूपलेखनप्रकारः -

मनस् + रथः इत्यत्र ''ससजुषो रुः'' इति सूत्रेण सस्य रुत्वेऽनुबन्धलोपे च कृते 'मनर् रथः' इत्यवस्थायां ''रो रि'' इत्यनेन पूर्वस्य रेफस्य लोपे 'हशि च' इत्यनेन उत्वे च प्राप्ते ''विप्रतिषेधे परं कार्यम्'' इति व्यवस्थानुसारं परत्वात् 'रो रि' इत्यनेन लोपे प्राप्ते ''पूर्वत्रासिद्धम्'' इति न्यायात् 'हशि च' इति सूत्रदृष्ट्या रोरीति त्रैपादिकस्य असिद्धत्वात् उत्वे कृते 'मन+उ+रथः' इति जाते 'आद्गुणः' इत्यनेन सूत्रेण 'ओ' गुणे एकादेशे कृते 'मनोरथः' इति रूपं सिद्धम्।

११४. एतत्तदोः सुलोपः अकोः अनञ्समासे हलि इतिच्छेदः। अकोः = ककाररहितयोः, एतत्तदोः = एतत्, तत् इति शब्दयोः यः प्रथमैकवचने सुप्रत्ययः, तस्य (सोः सस्य) लोपः भवति हलि परे, न तु नञ्समासे। सर्वनामशब्दानां टेः प्राक् स्वार्थे अकच्प्रत्ययः भवति। यत्र एतत्तदोः सर्वनामशब्दयोः अकच् न भवति, तादृशौ एतौ ककाररहितौ भवतः। ताभ्यां परः यः सुप्रत्ययः, तस्य हलि परे लोपः भवति, परन्तु नञ्समासे न भवति इति सूत्राशयः।

उदाहरणस्य विश्लेषणम् -

एषस् + विष्णुः, सस् + शम्भुः इत्यत्र ककाररहितौ एतत्तदौ वर्तेते, ताभ्यां परस्य सुप्रत्ययस्य लोपः भवति, यतो हि, व्यञ्जनवर्णः (हल्) ताभ्यां परः विद्यते। नञ्समासगतौ अपि एतौ शब्दौ अत्र न स्तः। अतः एष विष्णुः, स शम्भुः इति प्रयोगः भवति।

रूपलेखनप्रकारः -

एषस् + विष्णुः इत्यत्र हल्परत्वात् ककाररहितात् एतत्शब्दात् परस्य सुप्रत्ययस्य ''एतत्तदोः सुलोपोऽकोरनञ्समासे हलि'' इति सूत्रेण लोपे कृते, एष विष्णुः इति रूपं सिद्धम्। सस् + शम्भुः इत्यत्र सुलोपे स शम्भुः इति।

प्रश्नः -

अकोः किम् ? एषको रुद्रः। यदि ककाररहितयोः इति न उच्येत तर्हि ककारसहितस्य 'एषकस् + रुद्रः' इत्यत्र एतत्शब्दस्य अपि सुप्रत्ययस्य लोपापत्तिः स्यात्। अकोः इति कथने तु नैव सुलोपः, अस्य ककारसहितत्वात्। अनञ्समासे किम् ? असः शिवः। यदि नञ्समासे न प्रतिषिध्येत तर्हि असस् + शिवः इत्यत्र नञ्समासगतस्य तत् शब्दस्य अपि सुलोपापत्तिः स्यात्। कृते तत्र निषेधे तु न सुलोपः। यदि 'हलि' इति न उच्येत तर्हि अच्परस्यापि सुलोपापत्तिः भवेत्, तथा सति एषोऽत्र इति न सिद्ध्येत। 'हलि' इति कथने तु अस्य अच्परकत्वान्न सुलोपः इति भावः।

अन्यानि उदाहरणानि -

एष धर्मः सनातनः। एष रामः। स धावति। स कः इत्यादीनि।

११५. सोऽचि लोपे चेत्पादपूरणम् ६/१/१३४

सस् इत्यस्य सोर्लोपः स्यादचि, पादश्चेल्लोपे सत्येव पूर्येत। सेमामविड्ढिप्रभृतिम्। सैष दाशरथी रामः।

।। इति विसर्गसन्धिः।।

।। इति [१]पञ्चसन्धिप्रकरणम्।।

---

११५. सः अचि लोपे चेत् पादपूरणम् इतिच्छेदः। 'सः' इति पदस्य प्रथमैकवचने सुप्रत्ययस्य अचि परेऽपि लोपः भवति, यदि पद्यस्य पादपूर्तिः सुलोपे कृते एव स्यात्। यदि विनाऽपि लोपं पादपूर्तिः संभवा, तदा तु सुलोपः न भवति इति फलितम्।

उदाहरणस्य विश्लेषणम् -

'सस्+इमामविड्ढिप्रभृतिम्' इत्यत्र यदि सुलोपः न क्रियेत तर्हि सस्य रुत्वे 'भो भगो.' इति यत्वे 'लोपः शाकल्यस्य' इति यलोपे यलोपस्य पूर्वत्रासिद्धरीत्या असिद्धत्वात् गुणाभावदशायां, 'सस् एष दाशरथी रामः' इत्यत्र च उक्तरीत्या वृद्ध्यभावदशायां एकेन अधिकेन अक्षरेण पादपूर्तिः न भवति। अनुष्टुप्छन्दसि अष्टौ वर्णाः प्रतिपादम् अपेक्ष्यन्ते। सुलोपे कृते तु तस्य असिद्धत्वं न भवति, अतः गुणादेशः, वृद्ध्यादेशश्च संभवः। तथा सति 'सेमामविड्ढिप्रभृतिम्' इत्येवं ''सैष दाशरथी रामः'' इत्येवञ्च पादपूर्तिः भवति। अतः अत्र सोः लोपः भवति।

रूपलेखनप्रकारः -

'सस् + एष दाशरथी रामः' इत्यत्र पद्यस्य पादपूर्त्यर्थं अचि परे अपि ''सोऽचिलोपे चेत्पादपूरणम्'' इति सूत्रेण 'सः' इत्यस्य सोर्लोपे कृते 'स+एष.' इति जाते ''वृद्धिरेचि'' इति सूत्रेण वृद्ध्यैकादेशे कृते ''सैष दाशरथी रामः'' इति वाक्यं सिद्धम्।

अन्यानि उदाहरणानि -

सैष दाशरथी रामः, सैष राजा युधिष्ठिरः। सैष कर्णो महादानी, सैष भीमो महाबलः।। सैषस्तु लिखितः ग्रन्थः। [१]सन्धिः वर्णसन्धानम्। तत्र के पञ्चसन्धयः ? इति प्रश्ने-अच्सन्धिः, हल्सन्धिः, विसर्गसन्धिश्च इति त्रयः सन्धयः तु प्रसिद्धाः। चतुर्थः स्वादिसन्धिः। अच्सन्धौ प्रकृतिभावस्य पृथग्रूपेण निरूपितत्वात् प्रकृतिभावः पञ्चमः सन्धि इति विद्वाँसः आहुः।

<u>अभ्यासार्थ प्रश्नाः</u>

वस्तुनिष्ठ प्रश्नाः -

१. 'विष्णुस्त्राता' पदस्य सन्धिविच्छेदोऽस्ति -

(क) विष्णुष् + त्राता (ख) विष्णुः + त्राता

(ग) विष्णु + त्राता (घ) विष्णो + त्राता ( )

२. ''ससजुषो रुः'' इति सूत्रेण भवति -

(क) सः (ख) सजुषः

(ग) रुः (घ) आगमः ( )

३. 'शिवोऽर्च्यः' इत्यस्य सन्धिविच्छेदोऽस्ति -

(क) शिवाः + अर्च्यः (ख) शिव + अर्च्यः

(ग) शिवोस् + अर्च्यः (घ) शिवस् + अर्च्यः ( )

४. रेफस्य लोपो भवति -

(क) द्विरेफे परे (ख) सुपि परे

(ग) रेफे परे (घ) हशि परे ( )

५. 'मनोरथ:' इत्यत्र सन्धिविच्छेदोऽस्ति

(क) मनसा + रथ: (ख) मनस् रथ:

(ग) मनो: + अथ: (घ) मनर् + अथ: ( )

६. विप्रतिषेधे कार्यं स्यात् -

(क) असिद्धं (ख) सिद्धं

(ग) पूर्वं (घ) परं ( )

७. ''विसर्जनीयस्य स:'' इति सूत्रं सोदाहरणं व्याख्येयम्।

८. ''हशि चे'' ति सूत्रस्यार्थो लेख्य:।

९. निम्नाङ्कितपदानां ससूत्रं सिद्धि: कार्या।

हरि: शेते, शिवोऽर्च्य:, अहरह:, पुना रमते

१०. अधोलिखितानां पदानां सन्धि: कार्य:।

देवास् + इह, भोस् देवा:, हरिस् रम्य:, सस् + शम्भु:।

प्रयोगार्थाः

अच्सन्धिः

सुद्ध्युपास्यः	विद्वानों के उपासनीय
मध्वरिः	'मधु' नामक दैत्य के शत्रु (भगवान विष्णु)
धात्रंशः	ब्रह्मा का अंश
लाकृतिः	'लृ' के समान टेढी आकृतिवाला (कृष्ण)
हरये	हरि के लिए
विष्णवे	विष्णु के लिए
नायकः	नेता, प्रधान
पावकः	पवित्रकर्त्ता या अग्नि
गव्यम्	गौ का विकार, दुग्ध, दधि, घृत, गोमूत्र, गोबर आदि।
नाव्यम्	नौका से उतरने योग्य जल
गव्यूतिः	दो कोस
उपेन्द्रः	इन्द्र के छोटे भाई (वामन भगवान्)
गङ्गोदकम्	गङ्गा का जल
कृष्णर्द्धिः	कृष्ण की समृद्धि
तवल्कारः	तेरा लृकार
हर इह	हे हरि! यहाँ
विष्ण इह	हे विष्णु! यहाँ
कृष्णैकत्वम्	कृष्ण की एकता
गङ्गौघः	गङ्गा का प्रवाह
देवैश्वर्यम्	देवताओं का ऐश्वर्य
कृष्णौत्कण्ठ्यम्	कृष्ण की उत्कण्ठा
उपैति	पास आता है
उपैधते	समीप बढ़ता है।
प्रष्ठौहः	प्रष्ठवाहका (सिखाने के लिये जिसके गले मे काष्ठ बाँध देते हैं, ऐसे बछडे को 'प्रष्ठवाट्' कहते हैं।
उपेतः	समीप आया हुआ, युक्त
मा भवान् प्रेदिधत्	आप अधिक न बढावें
अक्षौहिणी	सेना - विशेष
प्रौहः	अधिक तर्क या उत्तम तर्क करने वाला
प्रौढः	चतुर, अधेड
प्रौढिः	प्रौढता
प्रैषः	प्रेरणा
प्रैष्यः	नौकर
सुखार्तः	सुख से प्राप्त हुआ, सुखी
परमर्तः	परम प्राप्त, मुक्त
वत्सतरार्णम्	बछडे का ऋण
कम्बलार्णम्	कम्बल का ऋण
वसनार्णम्	वस्त्र का ऋण
ऋणार्णम्	ऋण चुकाने का ऋण
प्रार्णम्	अधिक ऋण
दशार्णः	दस किले वाला देश

प्राच्छेति	अधिक चलता है।
प्रेजते	अधिक काँपता है।
उपोषति	जलाता हैं
शकन्धुः	शक देश का कूप
कर्कन्धुः	बदर फल (बैर)
मनीषा	बुद्धि
मार्तण्डः	सूर्य
शिवायों नमः	शिवजी को नमस्कार
शिवेहि	हे शिव! आइये
दैत्यारिः	दैत्यों का शत्रु (विष्णु)
श्रीशः	लक्ष्मीपति (विष्णु)
होतॄकरः	होता का ऋकार
हरेऽव	हे हरि! रक्षा करो
विष्णोऽव	हे विष्णु! रक्षा करो
गोअग्रम्	गौ का अग्र भाग
गवि	गौ में
गवेन्द्रः	गोस्वामी
आगच्छ कृष्ण३ अत्र गौश्चरति	हे कृष्ण! आइए यहाँ गौ चरती है।
हरी एतौ	ये दोनों हरि (सिंह) हैं।
विष्णू इमौ	ये दोनों विष्णु हैं।
गङ्गे अमू	ये दोनों गङ्गाएँ हैं।
अमी ईशाः	ये अधिपति हैं।
रामकृष्णावमू आसाते	ये बलराम और श्रीकृष्ण बैठे हैं।
अमुकेऽत्र	ये यहाँ हैं
इ इन्द्रः	अरे! यह इन्द्र है।
उ उमेशः	क्या यह उमेश हैं।
आ एवं नु मन्यसे	क्या तुम ऐसा मानते हो ?
आ एवं किल तत्	अरे यह वह है।
ओष्णम्	कुछ गर्म
अहो ईशाः	अहो ये अधिपति हैं।
विष्णो इति	हे विष्णु! ऐसा
किम्वुक्तम्	क्या कहा ?
चक्रि अत्र	विष्णु यहाँ है।
गौर्यौ	दो गौरी
वाप्यश्वः	वापी में घोड़ा
ब्रह्मर्षिः	ब्रह्म ऋषि, वशिष्ठ
आर्च्छत्	चला गया।

हल्सन्धिः

रामश्शेते	राम सोते हैं।
रामश्चिनोति	श्री राम चुनते हैं
सच्चित्	सत् और ज्ञानस्वरूप
शार्ङ्गिञ्जय	हे भगवन्! आपकी जय हो।

विश्नः	विचलना या गति विशेष
प्रश्नः	पूछना।
रामष्षष्ठः	राम छठा है।
रामष्टीकते	राम आता है।
पेष्टा	पीसने वाला
तट्टीका	वह टीका
चक्रिण्ढौकसे	हे चक्रधारी! आप जाते हैं।
षट् सन्तः	छः सत्पुरुष
षट्ते	वे छः
ईट्टे	स्तुति करता है।
सर्पिष्टमम्	सबसे अच्छा घृत
षण्णाम्	छह पुरुषों का
षण्णवतिः	छियानवे (९६)
षण्णगर्यः	छः नगरियाँ
सन्षष्ठः	छठा श्रेष्ठ है।
वागीशः	बृहस्पति
एतन्मुरारिः	ये भगवान् मुरारी हैं।
तन्मात्रम्	केवल उतना
चिन्मयम्	ज्ञानरूप
तल्लयः	उसमें लीन होना
विद्वाँल्लिखति	पण्डित लिखता है।
उत्थानम्	उन्नति, उठना
उत्तम्भनम्	अवरोध
वाग्घरिः	बोलने में शेर
तच्छिवः	वह शिव
तच्छ्लोकेन	उस श्लोक से या उसकी कीर्ति से
हरिं वन्दे	हरि को मैं नमस्कार करता हूँ।
यशांसि	बहुत से यश
आक्रंस्यते	आक्रमण करेगा
मन्यते	मानता है
शान्तः	शान्त
अङ्कितः	चिह्नित
अञ्चितः	पूजित या गत
कुण्ठितः	रुका हुआ
दान्तः	जितेन्द्रिय
गुम्फितः	गुंथा हुआ
त्वं करोषि	तुम करते हो
सँवत्सरः	वर्ष (संवत्)
सम्राट्	राजा
किं ह्मलयति	क्या चलाया जाता है ?
किं ह्यः	कल क्या था ?
किं ह्वलयति	क्या चलाया जाता है ?
किं ह्लादयति	कौन वस्तु प्रसन्न करती है ?
किं ह्नुते	क्या छिपाता है ?
प्राङ्ख्षष्ठः	छठा पूजित है

सुगण्षष्ठः	छठा गणितज्ञ है
सन्त्सः	वह सत्पुरुष है
सञ्छम्भुः	शम्भु सत्त्वरूप है
प्रत्यङ्ङात्मा	अन्तरात्मा, जीवात्मा
सुगण्णीशः	अच्छे गणितज्ञों का ईश
सन्नच्युतः	भगवान् अच्युत सत्स्वरूप है
संस्कर्ता	संस्कार करने वाला
पुंस्कोकिलः	पुरुषकोकिल (कोयल)
चक्रिँस्त्रायस्व	हे चक्रधारिन्, विष्णो रक्षा करो
प्रशान्तनोति	शान्त पुरुष विस्तार करता है
हन्ति	मारता है
नॄँ पाहि	मनुष्यों की रक्षा करो
काँस्कान्	किन किन को
शिवच्छाया	शिव की छाया
लक्ष्मीच्छाया	लक्ष्मी की छाया या शोभा

विसर्गसन्धिः

विष्णुस्त्राता	श्रीविष्णु रक्षक है
हरिश्शेते	हरि सोते हैं
शिवोऽर्च्यः	शिव पूजनीय हैं
शिवो वन्द्यः	शिव वन्दनीय हैं।
देवा इह	देवता यहाँ
भो देवाः	हे देवों
भगो नमस्ते	हे भगवन्! आपको नमस्कार है।
अघो याहि	आप जाइये
अहरहः	प्रतिदिन
अहर्गणः	दिन समूह
पुना रमते	फिर खेलता है
हरी रम्यः	हरि रमणीय है
शम्भू राजते	शम्भु शोभित हैं
तृढः	उद्यत, तैयार हुआ
मनोरथः	इच्छा
एष विष्णुः	यह विष्णु भगवान् है
स शम्भुः	वह शम्भु भगवान् है।
एषको रुद्रः	यह भगवान् रुद्र है।
असः शिवः	वह शिव नहीं है।
एषोऽत्र	यह यहाँ है।
सेमामविड्ढि प्रभृतिम्	इसे देने में आप समर्थ हैं। आप हमें इष प्रभृति प्रकृष्ट धारणा प्राप्त करावें।
सैष दाशरथी रामः	ये वे दशरथ के पुत्र श्रीराम हैं।

<u>इति विसर्गसन्धिः</u>

<u>इति पञ्चसन्धिप्रकरणम्</u>